यजुर्वेद-सामवेद-संस्कारभाष्यकर्त्रा वेदान्तसूत्रेषु वैदिकभाष्यनिर्मात्रा
भगवद्गीतासु भगवद्भाष्यरचयित्रा काशीपण्डित-सभया
"पण्डितराजे" त्युपाधिविभूषितेन स्वामि-
श्रीभगवदाचार्ययतिराजेन विरचितेन

काठकोपनिषत्संस्कारभाष्येण

संवलिता

काठकोपनिषत्

मङ्गलाचरणम्

यः कोपि मामनुदिनं विपदामगाधं,
पाथोनिधिं नयति नातिकृतार्थलीलः।
स श्रीपती रघुपतिः कृपणावलम्बः,
खेलायतां मदसुकन्दुभिरिन्दुशोभः ॥१॥
आचार्यपरमानन्दपदद्वन्द्वमुपास्महे ।
यत्कृपालेशतोपि स्यादुद्धारो नः क्षणादपि ॥२॥
दिव्यदृष्टिर्यतः प्राप्ता सत्यमार्गानुगामिनी ।
तामहं गुरुपादानां पादुकां शिरसा वहे ॥३॥
अरण्यं कण्टकाकीर्णं निर्भीकः प्रविशाम्यहम् ।
तत्र श्रीमद्गुरोः पादपङ्कजालम्बनं महत् ॥४॥
व्याख्यातुमुत्सहे भव्या भव्यैरुपनिषद्गवीः ।
भावैः शब्दैश्च सत्कृत्याः परमार्थप्रकाशिकाः ॥५॥
मृच्छिलाखण्डयुक्तोपि गोधूम इति कथ्यते ।
मृच्छिलाखण्डसंयोगवियुक्तो हि स भुज्यते ॥६॥
आचार्यचरणाम्भोजमन्यान्विद्यागुरूनपि ।
प्रणम्य कठवल्लीषु व्याख्यानं तन्यते मया ॥७॥
सज्जना जनयिष्यन्ति हृदयेत्र महादरम् ।
दुर्जना जनयिष्यन्ति हृदये विषमुल्बणम् ॥८॥
तेषामेव विषेण स्याद्धानिस्तेत दुरव्यया ।
पायाच्छ्रीराम एवात्र तान्सदेत्येव कामये ॥९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ काठकोपनिषद्

प्रथमाध्याये प्रथमा वल्ली

सर्वप्रसिद्धक्रमेणेयं तृतीयोपनिषत्। अत्र केनाख्यानेन चारित्रस्योपासनायाश्च हृदयावर्जकं चित्रं चित्रितमस्ति। अत्र पिता स्वपुत्रं मृत्युसन्निधौ प्रेषयति। मृत्युना नचिकेता उपदिष्टः। कोसौ मृत्युरासीदित्यत्र मामकीनो विचारोन्येभ्यो व्याख्याकारेभ्यो भिन्न एव। मृत्युर्न यमः। स च कश्चित्तत्कालीनो विद्वान्। परं यदि सर्वसम्मतो यम एवासौ स्यात्तदापि न काचित्क्षतिः। यमः क इति ज्ञानं नातीवावश्यकम्। तस्योपदेशाः कीदृशा इत्येव विचारणीयम्।

नचिकेताः पित्रा विसृष्टो यमसदनमुपासदत्। स च गृहाद्बहिर्गत आसीत्। त्र्यहानन्तरं स गृहमागतवान्। दृष्ट्वा च ब्राह्मणकुमारं स्वभवने त्रिभिर्दिनैः क्षुधितं पिपासितं च स भयादकम्पत तच्छापभयाच्च विकलितमनास्त्रीन्वरान्वरीतुमादिष्टवान्। नचिकेताः प्रथमेन वरेण ययाचे यदाहं भवतः सकाशात्पितृसन्निधिं प्राप्नुयां तदा स मयि प्रसन्नचेताः स्यादिति। द्वितीयेन वरेण स्वर्ग्यग्न्यवबोधनं प्रार्थयामास। तृतीयेन वरेण मरणानन्तरं कामवस्थां प्राप्नोति जीव इति प्रपच्छ। अस्या आख्यायिकारूपाया उपनिषदोयं प्रथमो मन्त्रः—

उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥

वाजश्रवसनामा कश्चनर्षिरुशन्कामयमानो यत्किमपि फलमिति शेषः। सर्ववेदसं सर्वस्वं ददौ प्रायच्छत्पात्रेष्विति। तस्य नचिकेता नाम पुत्र आसासीत्॥१॥

तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश। सोमन्यत ॥ २ ॥

यागः समाप्तः। दक्षिणादानं प्रारब्धम्। तत्र र्त्विग्भ्यो दक्षिणासु दीयमानासु गोषु कुमारमल्पवयस्कमपि सन्तं तं श्रद्धा सती बुद्धिराविवेश प्रविष्टवती। विश्वजिता यजमानस्य पितुरेतस्य कर्मणः काम्यत्वाद्दक्षिणया सत्या भाव्यमित्येषा बुद्धिस्तं प्रविवेश। ततः सोमन्यत व्यचारयत्। ऋत्विग्बहुत्वापेक्षया दक्षिणाबहुत्वौचित्याद्दक्षिणास्विति बहुवचम्॥२॥

नचिकेतसो विचारप्रकारमभिधत्ते—

पीतोदका जग्धतृण दुग्धदोहा निरिन्द्रियाः। अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत् ॥ ३ ॥

पीतोदकाः पीतमुदकं याभिस्ताः। अधुना पयःपानेप्यसमर्था इतियावत्। जग्धतृणा जग्धं भक्षितं तृणं याभिस्ताः। अधुना तृणभक्षणेप्यसमर्था इति यावत्। दुग्धदोहा दुग्धो दोहो याभ्यो यासां वा ताः। अधुना दुग्धदानेसमर्था इति यावत्। निरिन्द्रिया निर्गतानीन्द्रियाणि याभ्यस्ताः। इन्द्रियशक्तिशून्या दन्तनेत्रादिविकला इत्यर्थः। इत्थंभूता असमर्था जराजीर्णास्ता गा ददत्प्रयच्छन्स यजमानस्तांल्लोकान्गच्छति प्राप्नोति। कान्? ते ये इत्यर्थः। अनन्दा नाम। न नन्दयन्ति तेनन्दा निरानन्दा दुःखबहुलाः। ईदृशाँल्लोकान्दाता तादृशां गवां प्रयातीत्यर्थः॥३॥

दक्षिणावैगुण्यापचिकीर्षया नचिकेताः प्राह—

स होवाच पितरं तत कस्मै मां दास्यसीति द्वितीयं तृतीयम्। तं होवाच मृत्यवे त्वा ददामीति ॥ ४ ॥

स नचिकेताः पुत्रः पितरं वाजश्रवसमुवाच। तत तात मां कस्मा ऋत्विजे पुरुषाय वा दास्यसीति। ततेति प्रयोगो नचिकेतसः शैशवं द्योतयितुम्। अत्र स्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनरूपं दानं नापेक्षितं किन्तु रजकाय वस्त्रं ददातीतिवद्वेदितव्यम्। त्वत्प्रसृष्टं माभिवदोदीत्यादेदर्शनात्। पुत्रेणैवमुक्तः पिता न किञ्चिदुवाच। तस्मात्स द्वितीयं वारं तृतीयं च वारं तदेवापृच्छत्। पुत्रस्य निर्बन्धं दृष्ट्वा वाजश्रवस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आह मृत्यवे त्वा ददामीति। इतीतिवाक्यसमाप्त्यर्थकं वाक्यस्वरूपग्राहकं वाव्ययम् ॥ ४॥

पितृवचनमाकर्ण्य पितरमपृच्छत्—

बहूनामेमि प्रथमो बहूनामेमि मध्यमः। किं स्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥ ५॥

बहूनां मृत्युशिष्याणां मध्ये प्रथम एमि गमिष्यामि भविष्यामीतिभावः। बहूनां च मध्यमो भविष्यामि। केषांचिदपेक्षया मे प्राथम्यं भविष्यति केषांचिदपेक्षया च माध्यम्यम्। मृत्योर्बहवः शिष्याः सन्तीतिप्रतिपादने तात्पर्यम्। सत्सु बहुषु शिष्येषु यमस्य मृत्योः किं स्वित्कर्तव्यं कार्यमवशिष्टं भवेद्यन्मया साधनीभूतेन हेतुभूतेन वाद्येदानीं करिष्यति सम्पादयिष्यति सः॥ ५।

पिता पुत्राय कर्तव्यमुपदिशति—

अनुपश्य यथापूर्वे प्रतिपश्य तथापरे। सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६॥

यथा येन प्रकारेण पूर्वे पौर्वकालिका मृत्युसेवां कृतवन्तस्तेन प्रकारेणानुपश्य त्वमपि गत्वा कुरु। अपरे त्वत्त आवरकालिका जना यथा सेवां करिष्यन्ति, अनुपश्य तथा त्वमपि करिष्यसि। ननु सत्सु पूर्वेषु सत्सु चावरेषु कथं ममाकाशः सेत्स्यतीत्यत आह—मर्त्यो मनुष्यः सस्यमिव तृणादिवत् पच्यते पाकावस्थां प्राप्य विनष्टो भवति। पुनर्विनाशानन्तरं सस्यमिवाजायत उत्पद्यते। एवं च प्रवर्तमाने गमनागमनक्रमेवकाशचिन्तयालमिति वाजश्रवस उत्तरम् ॥ ६॥

एवं पित्रा प्रेरितः प्रेषितश्च नचिकेता मृत्योर्गृहं गतवान्। स नासीद्गृहे। प्रेषितस्य तस्य द्वारि स तिस्रो रात्रीः किमप्यनश्नन् किञ्चिदप्यपिबंश्चाध्यवात्सीत्। आगतं मृत्युमहाशयं केचनोचुः—

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्। तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ ७॥

ब्राह्मणो ब्रह्मविद्वान्वैश्वानरोऽग्निरिव सर्वोपकारी तेजस्वी च। अतिथिर्न विद्यते तिथिरागमनस्य यस्यैवम्भूतः कश्चन गृहान्प्रविशति येषामितिशेषः। ते तस्यातिथेरेतां शान्तिमर्घ्यपाद्यासनप्रदानरूपां कुर्वन्ति गृहमेधिनः। वैवस्वत हे सूर्यप्रभ अथवा यम उदकमर्घ्याद्येतस्मै प्रदातुं जलमाद्याहरानय ॥७॥

यश्चाहङ्कारवान् अतिथिं गृहागतं नार्चयति, तस्य दोषमाह—

आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्। एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ॥ ८॥

यस्याल्पमेधसोल्पज्ञानिनोज्ञानिनो वा मनुष्यस्य गृहे ब्राह्मणो ब्रह्मविद्वान् ब्रह्मजिज्ञासुर्वानश्नन्नशनमकुर्वाणो बुभुक्षित इत्यर्थः। वसति तस्याशाप्रतीक्षे एवं स्यादित्याशंसनमाशा। इदं भविष्यतीत्थं भविष्यतीत्याद्याकारः सङ्कल्पः प्रतीक्षा। ते द्वे अपि तथा संगतं प्राप्तं वस्तुजातं सूनृतं वेदाद्यध्ययनमिष्टापूर्ते इष्टं यागादिर्भवति। पूर्तं वापीतडागादिर्भवति। एतान्सर्वान्पुत्रपशूंश्च पुत्रांश्च पशूंश्च। एतदेतादृशाभ्यागतानशनरूपं वृजिनं वृङ्क्ते नाशयति। वृजी वर्जने ॥ ८॥

एवं श्रुत्वा मृत्युर्नचिकेतसमुवाच—

तिस्रो रात्रीर्यदवात्सीर्गृहे मेनश्नन्ब्रह्मन्नतिथिर्नमस्यः। नमस्तेस्तु ब्रह्मन् स्वस्ति मेस्तु। तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥ ९॥

हे ब्रह्मन्, नमस्यो नमस्कारार्होतिथिरभ्यागतस्त्वं यद्यस्माद्धेतोर्मे मम गृहेनश्नन् किमप्यभुञ्जानस्तिस्रो रात्रीरवात्सीर्निवासं कृतवांस्तस्मात्त्रीन्वरानिष्टपदार्थान् प्रतिवृणीष्व याचस्व। नमस्ते तुभ्यमस्तु स्वस्ति मे मम चास्तु ॥९॥

न हि लाभः कस्यचिद्धारायत इति त्वरितमेव वरं वव्रे नचिकेताः—

शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो। त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥१०॥

हे मृत्यो गौतमो गोतमवंश्यो मत्पिता शान्तसङ्कल्पो व्याकुलीभूय मया मत्पुत्रो दूरं प्रेषितस्तस्य किं भविष्यति कथं च स स्थास्यति संकल्पविकल्पौ यथा शान्तौ स्यातां तथा कर्तव्यमिति याचे। तथा स सुमना रागद्वेषादिपरिहारेण शोभनमना यथास्यात्तथापि भवता कर्तव्यमिति च याचे। तथा स मा अभि मां प्रति वीतमन्युः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शान्तक्रोधः स्यादित्यपि मे याच्ञा । त्वत्प्रसृष्टं त्वयेतः प्रेषितं मा मामभि प्रति प्रतीतः प्रीतः सन्वदेद्वाग्व्यापारं कुर्यात् । त्रयाणां वराणां मध्य एतत्प्रथमं वरं वृणे याचे ॥१०॥

एवं प्रार्थितो मृत्युरुवाच—

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः । सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥११॥

मत्प्रसृष्टो मया प्रेषिते त्वयि । सप्तम्यर्थे प्रथमौपनिषदी । औद्दालकिरुद्दालकस्यापत्यमारुणिररुणस्य गोत्रापत्यं त्वत्पिता यथा पुरस्तात्पूर्वमिव प्रतीतः प्रीतिमान्भविता भविष्यति । मृत्युमुखान्मत्सकाशात्प्रमुक्तं विसृष्टं त्वां ददृशिवान्दृष्टवान्सन् वीतमन्युः शान्तक्रोधो रात्रीर्यावती रात्रीर्जीविष्यति तावती रात्रीरित्यर्थः सुखं शान्तिपूर्वकं शयिता शयिष्यते ॥११॥

नचिकेता इदानीं द्वितीयं वरं प्रार्थयते—

स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति । उभे तीर्त्वाशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥१२॥

स्वर्गे लोके परमसुखास्पदे किञ्चन किञ्चिदपि भयं भीतिकरं नास्ति न विद्यते । तत्र न जरया बिभेषि नान्योपि बिभेति । तत्र जरासंचारो नास्तीतिभावः । उभे अशनायापिपासे क्षुत्तृषौ तीर्त्वा क्षुत्तृड्भ्यां रहितो भूत्वा शोकातिगः सर्वशोकानां सर्वशोकप्रदानां च हेतूनामतिगः परगो भूत्वा स्वर्गलोके सुखप्रधाने स्थाने मोदते जीवः ॥१२॥

द्वितीयवरशेषं द्वितीयेन मन्त्रेण याचते—

स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण ॥ १३ ॥

हे मृत्यो स त्वं महाविद्वान्स्वर्ग्यं स्वर्गः प्रयोजनं यस्य तथाभूतमग्निं लोकोत्तरं कञ्चिदग्निमध्येषि जानासि तमग्निं श्रद्दधानाय परमश्रद्धाय मह्यं प्रब्रूहि उपदिश । यतः स्वर्गलोकाः स्वर्गो लोको निवासस्थानं येषां ते परमधामनिवासिन इत्यर्थः । अमृतत्वममरणधर्मत्वं भजन्ते प्राप्नुवन्ति । अत एतदग्निवस्तु द्वितीयेन वरेण वृणे ॥ १३ ॥

एवं प्रार्थितो मृत्युरुवाच—

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् । अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम् ॥ १४ ॥

तदग्निवस्तु ते तुभ्यं प्रब्रवीम्युपदिशामि । मे मत्तः । पञ्चम्यर्थे षष्ठी । निबोधावबुध्यस्व । हे नचिकेतः स्वर्ग्यमग्निं प्रजानन्याथार्थ्येनावबुध्यमानो यः कोप्यनन्तलोकाप्ति नान्तो यस्य तस्य लोकस्य प्राप्तिमथो प्रतिष्ठां तत्र नैरन्तर्येण स्थितिं च लभत इति शेषः । यदि यः कोपि तमग्निं विज्ञाय मुक्तिलोकमाप्नोति कुतो न तर्हि सर्वे मानवास्तं गच्छन्ति ? कुतश्च सर्वेत्रैव जगज्जालैर्बद्धा अवसीदन्तीत्याह—एतं परमगोप्यमग्निं गुहायां निहितमनतिप्रसिद्धं सर्वैरविज्ञेयं त्वं विद्धि जानीहि । न जानन्त्यन्ये तत एव विषीदन्ति त्वं त्वधुना तं जानन्नवश्यं मुक्तो भविष्यसीत्यर्थः ॥१४॥

मृत्युर्नचिकेतसेपेक्षितं सर्वमुवाचेत्याह—

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा । सचापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनराह तुष्टः ॥१५॥

यमस्तस्मै नचिकेतसे लोकादिं लोकस्य जगत आदिमादौ प्रवर्तमानं तमग्निमुवाचोपादिक्षत् । या यावतीर्यथा च तत्रेष्टका अपेक्षिता ता अप्युवाच । सचापि नचिकेता अपि प्रत्यवदद्भवदुपदिष्टं सर्वमवगतं मयेत्यावेदयितुं स्वयमनूदितवान् यथोक्तम् । अथ तदनन्तरमस्य नचिकेतसस्तुष्टो मृत्युः पुनराह । मृत्युरग्निं वक्तुं प्रक्रान्तवान् । तस्याग्नेर् 'अनन्तलोकाप्तिम्", "निहितं गुहायाम्" इति द्वे विशेषणे महत्त्वपूर्णे अतएव विचारणीये । यद्यग्निशब्देन यज्ञो गृह्येत तर्हि नास्त्येकोपि यज्ञो यो याजकमनन्तलोकं प्रापयेत् न वा कोपि तादृशो यज्ञो वेदेष्वपि विहितो यो गुहायां निहितः स्यात् । सर्वं एव यज्ञाः प्रसिद्धा एव । अत्र यज्ञस्य नाम नैव गृहीतमुपनिषत्कारेण । किंचायमग्निर्लोकादिरिति मृत्युनोच्यते । कोसावग्निः काश्च तत्रेष्टकाः कियत्संख्याकाः कीदृशः कियत्यश्चेत्यादिकं न स्पष्ट-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तयोक्तमत्र। नैतत्तत्त्वं केपि विजानन्ति विज्ञातुं च शक्नुवन्ति। इदं तु निगदितुं शक्यते, अनन्तलोका इत्यस्यानन्ता लोका यत्र सोनन्तलोकः। अथवा लोकृ दर्शने। दर्शनं प्रकाशः। अनन्तः प्रकाशो यत्र सोनन्तलोकः। तस्य प्राप्तिम्। अनन्तलोकं ब्रह्मैव नान्यद्भवितुमर्हति। यदि किञ्चिदन्यत्, तर्हि तद्गुहायां न निहितम्। अतोवश्यमत्र सोग्निर्ब्रह्मैव, तदेव च लोकादि। तद्ब्रह्माप्तुं यादृश्यो यावत्यो याश्चेष्टका अपेक्षितास्ता यमेनोपदिष्टाः। यदि कश्चिल्लौकिकोग्निरेवात्राभीप्सितो भवेत्तस्य गुहायां निहितत्त्वं न प्रतिपादयेत्। लोकादित्वमपि तस्य न स्यात्। अतो निश्चप्रचं ब्रह्मैवात्राग्निः। तदर्थमिष्टका न लौकिक्यः। काश्चनालौकिक्य एव ताः। अतएव तस्य निर्देशो नाकारीह। किंच यद्यमेनोक्तं तन्नचिकेताः प्रत्यवददित्यनेन स्पष्टमेव विज्ञायते नासौ लौकिकोग्निर्नं वा लौकिक्य इष्टकाः। किंच मृत्युः पुनराह तुष्ट इत्यत्र तोषस्य कारणं गवेषणीयम्। नान्यत्किञ्चित्। केवलं तदेव, यद्गुरूक्तं तेनानूदितम्। लोकेपि दृश्यते गुरूक्तं यः शिष्योस्खलितमनुवदेद् गुरुस्तस्मिंस्तुष्येदेव। अतः स्पष्टमेतद्विज्ञेयं नात्र लौकिकोग्निर्नं वा लौकिक्य इष्टकाः। यदीष्टका अत्र लोकख्याता मृन्निर्मिता अग्निना पक्वा न गृह्यन्ते तर्हि तदर्थोन्योन्वेषणीयः। विज्ञायते तु सर्वथैतेनात्र लौकिकाग्नेः सर्वथा प्रकरणम्। अत्रेष्टकाशब्देन यमा वा नियमा वा गृहीताः स्युरित्यपि संभवः। अत्रैतावदेव तिष्ठतु। अग्रे पुनरेतद्विचारयिष्यते ॥ १५ ॥

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः। तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण ॥ १६ ॥

प्रीयमाणः प्रसीदन्स महात्मा महानात्मा विचारो यस्य महान् महद् आत्मा मनो यस्येति वा। तमब्रवीत्। किमब्रवीदित्याह–तव तुभ्यमद्यात्र भूयोधिकं वरं ददामि। किं तत्? आह। अयमग्निर्मयोपदिष्टस्तवैव नाम्ना भविता प्रख्यातो भविष्यतीत्यर्थः। अत इमामनेकरूपामनेकैकरूप्यां वेदितव्यां सृङ्कां विभूषयित्रीं मालां गृहाण। गृहाणेत्युक्त्या तत्त्वज्ञानं तेन ग्राहितमिति प्रतीयते। तत्रैव नाम्ना भवितायमग्निरित्युक्तमाशीः प्रदात्रा यमेन परं न दृश्यते श्रूयते वा कुत्राप्ययमग्निः। ततः "न चिकेतो ज्ञानं यस्य स नचिकेताः।" एवं च नचिकेतसो नाम्नि प्रयुक्तं यत्पदं नचिकेतोरूपं तेनैव पदेन तेनैव वा शब्देन सोग्निः प्रख्यातो भविष्यतीति तात्पर्यम्। एवं च नचिकेतो ब्रह्म। तच्च तव नाम्ना सादृश्यं धत्ते। एवमन्यदपि गूढं तात्पर्यमन्वेष्टव्यमिहेति ॥ १६ ॥

तामेव सृङ्कामुद्दिश्याह —

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू। ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति ॥ १७ ॥

नाचिकेत इत्यौपनिषदः प्रयोगः। त्रिणाचिकेतस इत्यर्थः। त्रिःकृत्वो नचिकेतसो नाम गृहीत्वोपदिष्टोग्निस्त्रिणाचिकेतोग्निः। प्र ते ब्रवीमीत्यत्र प्रथमं नचिकेतसो नाम ग्रहणम्। लोकादिमग्निमित्यत्रापि तस्मै, सः, अस्येतित्रिपदेन स एवोक्तः। तमब्रवीदित्यत्रापि तस्यैव ग्रहणम्। एवं त्रिः कृत्वा तस्यैव नाम्न ग्रहणं श्रुतौ जातमिति नचिकेतसमधिकृत्य त्रिस्तस्योपदेशो जातस्तेन स त्रिणाचिकेत इतिशब्देन प्रसिद्धिमगमत्। नचिकेतसे त्रिरुपदिष्टोयोग्निस्तम्। त्रिणाचिकेत इति सकारान्तं नपुंसकं द्वितीयान्तं पदं विज्ञेयम्। त्रिभिर्मनसा वचसा कर्मणा च सन्धिमनुसन्धानमेत्य प्राप्य त्रीणि कर्माणि कृतानि क्रियमाणानि करिष्यमाणानि च कृन्तति छिनत्तीति त्रिकर्मकृत् सन् जन्ममृत्यू तरति। कर्माण्येव जन्मनो मृत्योश्च कारणम्। तदभावे तदभावस्य न्याय्यत्वमेव। किं च जज्ञं जगदुत्पादकमीड्यं स्तुत्यं देवं ब्रह्म विदित्वा निचाय्य ब्रह्मैवास्मकं शरणमिति निश्चित्य चेमां सर्वैः प्राप्यमाणामिष्टां वा शान्तिमत्यन्तमतिशयेनैति प्राप्नोति। अत्र ब्रह्मेति जज्ञमिति च पृथक्पदे। यावन्न कर्मणामात्यन्तिकोत्ययस्तावन्न शान्तिः सुलभेत्युक्तम्। कर्मणामत्यय एव जज्ञमीड्यं ब्रह्म विदितं भवतीत्यप्युपदेशस्य परमतत्त्वम् ॥ १७ ॥

पुनरपि तामेव सृङ्कां विवृणोति—

त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वांश्चिनुते नाचिकेतम्। स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिणाचिकेतस्त्रिणाचिकेतसमेतत्त्रयं जज्ञं देवमीड्यं चेति विशेषणत्रयविशिष्टमेतद्ब्रह्म विदित्वा ब्रह्मवेदनानन्तरं यो विद्वान्नाचिकेतं नाचिकेतसमेवं चिनुते मनुते, सन्दधाति वा स पुरतः स्वाग्रे-वर्तमानान् मृत्युपाशान् प्रणोद्य दूरीकृत्य शोकातिगः सन् स्वर्गलोके लौकिकसुखदुःखादिशून्यस्थाने मोदते प्रसीदति सर्वदुःखविनिर्मुक्तो भवतीत्यर्थः। स्वर्गशब्दो नात्र देवलोकवाचकः। किन्तु स्वः सुखं गमयति स स्वर्गो लोको मोक्षलोक इत्यर्थः। रागद्वेषक्रोधलोभमोह-मदम्भमात्सर्यादयो 'मृत्युपाशास्तत एव मृत्युपाशा-नित्यत्र बहुवचनम्। पुराणप्रसिद्धे स्वर्गलोके नैव दृश्यते शोकातिगत्वम्। इन्द्रोपि स्वर्गस्य राजा सन्नपि न भवति शोकातिगः। अतः स्वर्गलोको मोक्षस्थिति-रेव॥ १८॥

यो वाप्येतां ब्रम्हजज्ञात्मभूतां चितिं विदित्वा चिनुते नाचिकेतम्। स एव भूत्वा ब्रम्हजज्ञात्मभूतः करोति तद्येन पुनर्न जायते॥ १९॥

नाचिकेतसमग्निं स्तवीति। यो वापि यः कोपि वैतां ब्रह्मजज्ञात्मभूतां ब्रह्म च तज्जज्ञं च तस्यात्म-भूतां ब्रह्मस्वरूपामित्यर्थः। चितिं विदित्वा नाचिकेतं चिनुते स एव ब्रह्मजज्ञात्मभूतः परब्रह्मस्वरूपः संस्तत्क-रोति येन पुनर्न जायते। जन्मबन्धनात्प्रमुक्तो भवतीत्यर्थः।

इदानीं तृतीयं वरं दातुकामो यमो मध्योत्थापि-तमिदं प्रकारणमुपसंहरति—

एष तेग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण। एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व॥ २०॥

यमोब्रवीत्। नचिकेतः, यं त्वं द्वितीयेन वरेणा-वृणीथा एषोग्निस्ते तुभ्यं कथितः। किं चैतमग्निं जनासो जनास्तवैव प्रवक्ष्यन्ति त्वन्नाम्नायमग्निः प्रख्यातो भविष्यति। पूर्वमपि षोडशे मन्त्रेयमेवार्थ उदीरितः। श्रमसहिष्णूनामृषीणां द्विस्त्रिर्वक्तुं न श्रमः। हे नचिकेतस्तृतीयं वरं वृणीष्व॥ २०॥

येयं प्रेते विचिकित्सा मनुष्येस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः॥ २१॥

प्रेते मृते मनुष्ये या इयं विचिकित्सा सन्देहः। विचिकित्सास्वरूपं विवृणोति–मृते सति मनुष्ये अस्ती-त्येके नास्तीति चैके विद्वांसो वदन्ति। मरणानन्तरं न पुनर्जन्मेत्येकेषां मतम्। पुनर्जन्मेत्येकेषाम्। तत्र मामकीनापि विचिकित्सा। अतस्त्वया परमविदुषानु-शिष्ट उपदिष्ट इत्यर्थः। अहमेतद्विद्यां जानीयामित्येष वराणां तृतीयो वरः। पुरापि पुनर्जन्मविषये विशयो-स्त्येव। अदृष्टे वस्तुनि सर्वदैव सन्देहावकाशः॥ २१॥

मरणानन्तरं जीवो भवति न वा पुनर्जन्म भवति न वेति पृष्टो मृत्युः शिष्यस्य नचिकेतसः परीचिक्षिषया तत्त्वोपदेशं निषेधन्नाह—

देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयमणुरेष धर्मः। अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम्॥ २२॥

नचिकेतः पुरा देवैरन्यैरपि विद्वद्भिरत्रास्मिन्विषये विचिकित्सितं सन्देहः प्रदर्शितः। हि यतोयं विषयो न सुज्ञेयं सुखेन विज्ञेयः। अणुरेष धर्मोतीव सूक्ष्मोयं विचारः। ततस्त्वमन्यं वरं वृणीष्व। मां मोपरोत्सीरु-परोधमाग्रहं मा कुरु। एनं वरं मा अतिसृज रचय पृच्छेतिभावः॥ २२॥

नचिकेताः प्राह—

देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ। वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरतुल्य एतस्य कश्चित्॥ २३॥

मया जिज्ञासितं वस्तु यदीदृशं यत्र देवैरपि विचि-कित्सितं किल। हे मृत्यो त्वं च त्वमपि यत्सुज्ञेयं सुखेन ज्ञेयं नास्तीत्यात्थ। तर्हि मन्येहमेतस्य तुल्यः कश्चिद्वरो नास्ति। अस्य प्रश्नस्य वक्ता उत्तरयिता त्वादृगन्यो न लभ्य इति मे निश्चयः॥ २३॥

एतस्मिन्नर्थे तस्यौत्सुक्यं द्रढयितुं पुनराहाचार्यो यमः-

शतायुषः पुत्रपौत्रान्वृणीष्व बहून्पशून्हस्तिहिरण्य-मश्वान्। भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि॥ २४॥

हे नचिकेतः, शतायुषः शतं वर्षाण्यायूंषि येषां तांश्चिरजीविन इत्यर्थः पुत्रपौत्रान् पुत्रान् पौत्रांश्च बहून्पशून् गवादीन् अश्वान् हस्तिहिरण्यं हस्तिनो हिरण्यं च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृणीष्व। भूमेर्महदायतनं महद्भूमण्डलं च वृणीष्व सर्वं त्वदपेक्षितं दास्यामि। नैतदेव, यावतीः शरदस्त्वं जीवितुमिच्छसि जीवेति मया प्रसन्नेनायाचितमपि दीयते॥ २४॥

यदीतोन्यदपि त्वमिच्छसि तदप्यहं दास्यामीत्याह—

एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीवितं च। महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि॥ २५॥

नचिकेतः, एतत्तुल्यं यन्मया तुभ्यं दातुं प्रतिज्ञातं न चेत्तत्त्वदिष्टं तर्ह्येतत्तुल्यं यद्यन्यं वरं मन्यसे तद् वृणीष्व। हिरण्यदित्सा तु मयैव प्रकटिता परं ततोप्यधिकं किञ्चिद्वित्तं धनं चिरजीविकां च चिरस्थायिनीं जीवननिर्वाहसामग्रीमपि वरं वृणीष्व। इतोप्यधिकमयाचितेन मयाशीर्दीयते यत् त्वं महाभूमावेधि भव सम्राडितिशेषः। इतोप्यधिकं दातुं प्रतिजानेकामानां सर्वेषां दिव्यानां मानुषाणां चाभिलाषाणां त्वा कामभाजं पूर्णाभिलाषं करोमि॥ २५॥

ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामांश्छन्दतः प्रार्थयस्व। इमा रामाः सरथाः सतूर्या नहीदृशा लम्भनीया मनुष्यैः। आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः॥ २६॥

ये ये कामाः काम्यन्त इति कामाः पदार्था मर्त्यलोके दुर्लभा दुःखेन लभ्यव्यास्तान्सर्वांश्छन्दतः स्वेच्छया प्रार्थयस्व याचस्व। स्वयमेव कांश्चन कामान्परिगणयति—इमाः सर्वजनाभ्यर्थनीया रामाः "स्फुटद्रोमोद्भेदस्तरलतरताराकुलदृशो, भयोत्कम्पोत्तुङ्गस्तन-युगभरासंगसुभगः। अधीराक्ष्या गुञ्जन्मणिवलयदोर्वल्लिरचितः, परीरम्भो मोदं जनयति च संमोहयति च॥" इत्येवमाद्युक्तरीत्या रसयित्रीर्नृत्यवाद्यगानादिभी रमयित्रीर्वा सरथा रथयुक्ताः सतूर्या वाद्यादिसहिता मनुष्यैरीदृशा न लम्भनीयाः सर्वथा दुष्प्रापा मया दातुं शक्यन्ते। मत्प्रत्ताभिर्मया दत्ताभिराभिः परिचारयस्व शुश्रूषां कारयस्व। यथेच्छं विनियुङ्क्ष्वेत्यर्थः। परं हे नचिकेतः, मरणमनु मरणानन्तरं किं भावीति मा प्राक्षीर्न पृच्छ। यमाधिकारे दातुं प्रतिज्ञातानि वस्तून्यासन्नेवेति न विचार्यम्। नचिकेतसा पृष्टस्य वस्तुनः केवलं मूल्यमनुमोदनीयम्॥ २६॥

एवं प्रलोभितो नचिकेताः स्थिरमनस्कतया प्राह—

श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः। अपि सर्वं जीवितल्पमेव तवैव वाहास्तव नृत्यगीते॥२७॥

नचिकेता बालोभवदबालो वेति निश्चेतुं शक्यम्। तत मां कस्मै दास्यसीति प्रश्नेनानुमातुं शक्यं स बाल आसीदिति। अत्र महद्द्वाढर्यं दर्शयन्स ज्ञानभातभृतभाण्डिमव प्रतीयते। अस्तु नासौ चर्चात्राचर्नीया। स कथयति—श्वोभावाः इत्यत्र श्वः भावा इतिच्छेदः। श्व एव भावः सत्ता स्थितिर्येषां ते श्वोभावाः। दिनद्वयस्थायिन इत्यर्थः। अथवा श्वः अभावा इतिच्छेदः। श्व एवाभावोनवस्थितिर्येषां ते श्वोभावाः। दिनद्वयमपि न स्थायिन इत्यर्थः। हे अन्तक यम त्वयोक्ताः कामाः श्वोभावा अचिरस्थायिन इत्यर्थः। ते सर्वेन्द्रियाणां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च यद् एतत् तेजस्तज्जरयन्ति क्षपयन्ति रमारमणं वाजिगजराजादिवाहनं मनोहारिहिरण्यादिनिर्मितालंकारादिधारणं सर्वमिन्द्रियौजः क्षयायैव भवति। चिरकालं जीवित्वापि मरणं चेदन्ते नियतं तर्हि चिरजीवित्वमप्यल्पमेव। तदेवाह—सर्वं जीवितमपि चिरायुष्ट्वमपि निश्चितमल्पमेव। एवं च हे यम तव वाहास्तवैव सन्तु तव नृत्यगीत-नृत्यगीतसाधनीभूता रामा अपि तवैव सन्तु। नास्ति तेषां मे प्रयोजनम्॥२७॥

नचिकेताः पुनः पूर्वप्रार्थितं स्ववरं प्रति स्वाग्रहं द्रढयन्नाह—

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्वा। जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥२८॥

मनुष्यो वित्तेन धनेन न तर्पणीयः। धनं प्राप्याधिकधनायाभिलाषो जागर्त्येव। अथवा मननान्मनुष्यो मननशीलो विनाशशीलैः सांसारिकैः पदार्थैर्नात्मलाभो भवितुमर्हतीतिविचारशीलो भवति। अहमपि मनुष्यः। त्वा त्वामद्राक्ष्म चेत्सर्वं वित्तं लप्स्यामहे। बहुवचनमिहाकिञ्चित्करम्। अथवा गर्वप्रदर्शनार्थम्। त्वद्दर्शनान्तरं न भवेत्किञ्चिदपि मे प्राप्यमिति। किं चिरजीवित्वेपि न मेभिलाषः। यावत्त्वमीशिष्यसि ईशिष्यसे जीवितुमिच्छसीति तात्पर्यम्। तावज्जीविष्यामः। अत्रापि बहुवचनं जीविते न मे स्पृहेति गौरवप्रदर्श-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नार्थमेव । धनेन तृप्तिराकाशकुसुमवत्प्रत्येया । जीवितेपि न मेतीव गर्धा । अतो वरस्तु मे मम स एव वरणीयो नान्य इति ॥२८॥

ऐहिकसुखमनुबुभूषूणामविवेकित्वं प्रतिपादयन्नाह पुनर्नचिकेताः—

अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्व तदास्थः प्रजानन् । अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घंजीविते को रमेत ॥२९॥

अजीर्यतां वयोहानिमननुभवताम् अमृतानां मरणधर्मरहितानाम् । येषां न जराया भीस्तेजीर्यन्तः । येषां न मृत्योर्भीस्तेमृताः । एतादृशां भवतां सान्निध्यमुपेत्य प्राप्य जीर्यंस्त्रिविधदुःखदावानलेन परिपच्यमानो मर्त्यो मनुष्यः पुनः पुनर्जन्ममरणादिपात्रीभूतो मादृशः प्रजानन्संसारो न परमार्थ इति सम्यग् जानन्क्व कथं तदास्थस्तस्मिन्संसार आस्था यस्य तादृशः संसाररतिमानित्यर्थः । स्यादितिशेषः । किंच वर्णरतिप्रमोदान् वर्णो गौरादिः । रतिः प्रमदालिङ्गनम् । प्रमोदः सांसारिकसुखानुभूतिप्रसूतानन्दविशेषः । एतान्सर्वानभिध्यायन्विचारदृष्टया मिथ्यात्वेन निरूपयन्नतिदीर्घंजीविते ब्रह्माद्यायुष्यमवाप्यपि क्षयमधिगमिष्यति जीवित इत्यर्थः । को मन्दभाग्यो रमेत रतिं दध्यादित्यर्थः । जरामरणदुःखशून्यानां भवतां सान्निध्यं समुपगम्य न हि मादृशा संसारोन्मुखेन भवितव्यम् । ब्रह्माद्यायुःपर्यन्तजीवनमपि नातिदीर्घंजीवनमिति न कोपि ज्ञानवान्प्रमदाद्यापादितप्रमोदान्प्रेप्सुः स्यादित्याशयः । २९॥

तर्हि यज्ज्ञातुमहमिच्छामि तत्त्वेतदेव—

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत् । योयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥३०॥

इति काठकोपनिषदि प्रथमा वल्ली

उपसंहरति । हे मृत्यो यस्मिन्महति विलक्षणे साम्पराये परलोकविषये अस्ति नास्ति वेतीदं विचिकित्सन्ति विद्वांसस्तन्मे मह्यं ब्रूहि्युपदिश । मामकीनां दृढां प्रतिज्ञां च निभालय योयं मयोपस्थापितो वरो गूढमनुप्रविष्टो दुर्विज्ञेयत्वं प्राप्तस्तस्मादन्यं वरं नचिकेता न वृणीते ॥३०॥

इति श्रीकाठकोपनिषदि प्रथमावल्ल्यां काशी-पण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-परिव्राजकाचार्य-स्वामि-श्रीभगवदाचार्येण निर्मितं काठकोपनिषत्संस्कारभाष्यम् ।

●

अथ काठकोपनिषदि

प्रथमाध्याये द्वितीया वल्ली

नचिकेतसो मुमुक्षुत्वं विनिश्चित्य श्रेयः स्तौति—

अन्यच्छ्रेयोन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः । तयोः श्रेय आददानस्य साधु भवति हीयतेर्थाद्य उ प्रेयो वृणीते ॥१॥

श्रेयःशब्देन जगदतिरिक्तं वस्तु गृह्यते स च मोक्ष एव । प्रेयःशब्देन जागत्कमेव वस्तु गृह्यते । अन्यदन्यधर्मं श्रेयोन्यधर्मं प्रेय इति । उभे एते नानार्थे भिन्नप्रयोजने पुरुषमात्मानं सिनीतो बध्नीतः । षिञ् बन्धने । श्रेयस्तु पुरुषस्य मुक्तिहेतुः प्रेय एव बन्धनहेतुः । कथं तर्हि उभे पुरुषं सिनीत इति । सत्यम् । बन्धनमत्र कर्मनियुक्तिरेव । प्रेयोपि कर्मणि नियुङ्क्ते जीवं श्रेयोपि । परमुभे नानार्थे विरुद्धप्रयोजने । प्रेयसः प्रयोजनं संसाराभिवृद्धिः । श्रेयसः प्रयोजनं संसृतिविरक्तिविवृद्धिः । एवं सति तयोः श्रेयःप्रेयसोः श्रेय आददानस्य स्वीकुर्वाणस्य साधु भवति श्रेयो भवति । य उ यश्च प्रेयो वृणीते सोर्थाच्छ्रेयसो हीयते भ्रष्टो भवति । उ चार्थे ।

उक्तार्थमेव रीत्यन्तरेणाह—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः। श्रेयो हि धीरोभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥२॥

श्रेयःप्रेयसी उभे मनुष्यमेतः प्राप्नुतः। तौ ते सम्परीत्य सम्यग्विविच्य धीरो विविनक्ति पृथक्करोति। विचिर् पृथग्भावे। तयोरेकं स्वीकृत्यान्यत्पृथक्करोति परित्यजति। तदेवाह—धीरः प्रेयसोपेक्षया श्रेयोहि अभिवृणीते। सर्वथा स्वीकुरुते। मन्दोल्पमतिश्च योगक्षेमाद्। हेतौ पञ्चमी। योगक्षेमौ हेतूकृत्य प्रेयो जागत्कमेव वस्तुजातं वृणीते। योगक्षेमार्थं वित्तपुत्रदारपश्वादीनां जिघृक्षा न भवति पापाय न वा निन्दायै। प्रेयसः संग्रहेतिरेक एव निन्दनीयः। बुभुक्षितः पिपासातुरश्च न श्रेयसे प्रवृत्तिं कर्तुं शक्नुयात्। गृहाश्रमी प्रेयःपदार्थपरित्यागेन क्षणमपि तदाश्रमव्यवहारं निर्वोढुं नैव शक्नुयात्। यश्च श्रेयो वृणीते तस्याप्युदरं तु स्थास्यत्येव। सति शरीरे आधिव्याधी अपि प्रवर्तेतामेव। तदर्थमपि प्रेयःशब्दाभिप्रेतं वस्तु संजिघृक्षितमेव स्यात्। न तत्र दोषः। दोषस्तु तदा भवति यदा निरर्थकोपकरणसंजिघृक्षया स निपीडितो भवति। उपनिषत्कारः स्वसमयं संस्मृत्य प्रेयो नाभिप्रैति। नायं स समयः। इदानीं भिक्षावृत्तिर्लज्जायै निन्दायै च भवति। नेदानीं निरङ्कुशं वनम्। अतो न वने निर्मातुं शक्यमुटजादिकम्। वृक्षवासोपि दुष्करः। अतो न सर्वथा प्रेयःपराजये पराक्रमः स्तुत्यः। यथाकालं जीवनकला कलनीयेत्येव प्रशस्यम् ॥२॥

स त्वं प्रियान्प्रियरूपांश्च कामानभिध्यायन्नचिकेतोत्यस्राक्षीः। नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ॥३॥

स त्वं मया बहुशः प्रलोभ्यमानोपि प्रियान्प्रियरूपांश्च कामान् पदार्थानभिध्यायन्नभितश्चिन्तयन्विचारयन्वात्यस्राक्षीरत्याक्षीः। वित्तमयीमेतां सृङ्कां सृतिं हे नचिकेतस्त्वं नावाप्तो यस्यां सृङ्कायां बहवो मनुष्या मज्जन्ति। सर्वथा परीक्षितस्त्वं पदमपि श्रेयसो न व्यचलः एवं च त्वमवश्यं श्रेयोधिकारीति ॥३॥

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता। विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोलोलुपन्त ॥४॥

अविद्या प्रेयोभिलाषः। विद्या श्रेयोभिलाषः। या अविद्येति ज्ञाता या च विद्येति ज्ञाता, एते उभे अपि दूरं दूरेण विषूची विष्वंगञ्चनशीले भिन्नगतो इति तात्पर्यम्। अविद्याधःपाताय भवति विद्या चोर्ध्वंनयनायेति दूरमित्युक्तम्। बहवो बहुविधाः कामाः कामिजनभोग्यास्त्वा त्वां नालोलुपन्त श्रेयआलिङ्गनरूपात्कल्याणपथान्न विचिच्छिदुः। अतस्त्वां नचिकेतसं विद्याभीप्सिनं विद्याभिलाषिणं मन्ये ॥४॥

पूर्वोक्तामविद्यां निन्दति—

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः। दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥५॥

अविद्यायां सांसारिकवैषयिकपदार्थरूपायामन्तरे मध्ये वर्तमाना नानाविधभवीयसुखदुःखजातेन परिव्रियमाणाः स्वयं धीरा अन्ये तांस्तथा मन्येरन्नवा तथापि धीरत्वेनात्मानं ख्यापयन्तः पण्डितं चात्मानं मन्यमाना मूढा मूर्खा अज्ञानेन विमोहिता अन्धेनैव नीयमाना अन्धा इव दन्द्रम्यमाणाः कुटिलगत्या जीवन्तं यापयन्तः परियन्ति यथार्थमार्गावाप्तिविरहेणेतस्ततो गच्छन्ति मार्गं च न लभन्ते ॥५॥

पुनरप्यविद्यामेवाविद्यावन्निन्दामुखेन निन्दति—

न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्। अयं लोको नास्ति पर इतिमानी पुनः पुनर्वशमापद्यते मे ॥६॥

सम्परेयत इति सम्परायः। अथवा सम्परैति इति सम्परायः। युद्धम्। अत्रोत्तरकाल इत्यर्थः। सम्पराय एव साम्परायः। भविष्यति किं भावीति प्रमाद्यन्तं प्रमादवन्तं वित्तमोहेन मूढं बालमविवेकिनं न प्रतिभाति न प्रतीयते न दृश्यते। अतएवायमयमेव लोको केवलमिदमेव जन्म नास्ति परः परमितिमानी इतिमतिमान् पुनःपुनर्मे मम वशमापद्यते प्राप्नोति। इदमेवजन्म नापरमिति यो मन्यते सोज्ञानकशाताडित एव। अतः पौनःपुन्येन स जनिमृतिदुःखाम्बुधौ निमज्जतीति ॥६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः। आश्चर्योवक्ता कुशलोस्य लब्धाश्चर्यो-ज्ञाता कुशलानुशिष्टः ॥७॥

येयं प्रेत इतिश्रुत्या परलोकपरलोक्यात्मविषयक-विशयमपाकर्तुं प्रार्थयमानस्य नचिकेतसस्तादृशप्रश्न-प्रशंसामुखेन महत्त्वमुपवर्णयितुकामो यम आत्मतत्त्वं स्तौति। य आत्मा श्रवणायापि बहुभिर्भाग्यहीनैर्नरैर्न लभ्यः प्राप्यः। किञ्चिद्भाग्यसामर्थ्येन केचन तं श्रोतुं प्रवृत्ता यदि तर्हि शृण्वन्तोपि ते यमात्मानं न विद्युर्न विजानीयुः। तादृशभाग्यसामर्थ्याभावादिति-भावः। तत्र कारणमाह। अस्यात्मतत्त्वस्य कुशलस्तीक्ष्ण-बुद्धिविशिष्टो वक्ताश्चर्यो विरल एव। एवं कुश-लानुशिष्टो विद्वत्प्रतिबोधितोस्य ज्ञाता लब्धा प्राप्ता चाप्याश्चर्यो विरलः। कुशलो वक्तापि दुर्लभः, तेन प्रतिबोधितो ज्ञातापि तस्य दुर्लभ एवेतिभावः। प्राक्त-तेन्द्रियागोचरे वस्तुनि परमगुर्वनुग्रहगृहीतसच्छिष्य-मन्तरेण न कस्यचिदपरस्यानधिगतसदाचार्यचरणपरि-चर्यस्य चेतनस्य सामर्थ्यं प्रसरतीतितत्त्वमुपदेष्टुमस्याः श्रुतेरारम्भः। परतत्त्वोपदेशको गुरुस्तदुपदेशचयन-चिन्ताचातुरीसमावर्जितहृदयः शिष्यश्च दुर्लभ इत्युप-दिशन्त्यानया श्रुत्या न यः कोपि गुरुः सम्पादनीयो न वा यः कोपि यतस्तत आगतः शिष्यः सम्पादनीय इति प्रतिपादितम्। येयं प्रेते इतिश्रुत्या धर्मिजिज्ञासा-मुखेनैव धर्मजिज्ञासाभिप्रेतेति प्राधान्येनात्र धर्मिण आत्मनः स्वरूपस्य निरूपणम् ॥ ७ ॥

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्य-मानः। अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान्ह्यतर्क्य-मणुप्रमाणात् ॥ ८ ॥

बहुधा बहुभिः प्रकारैश्चिन्त्यमानो विचार्यमाण उपवर्ण्यमानो वा। अपीतिशेषः। एष आत्मा न सुविज्ञेयः सुष्ठु विज्ञेयः। एवमवरेण तत्त्वज्ञानाचार-विचारहीनेनापि नरेण प्रोक्त एष न सुविज्ञेयः। अन-न्येन ब्रह्मानन्यभूतेन विदुषा प्रोक्तेपि नास्त्यत्र गतिः। वागविषयत्वात्। उभयत्र हेतुमाह—अणीयानतीव सूक्ष्म-मात्मतत्त्वम्। अतएवातर्क्यं तर्केणागम्यम्। तत्रान्य-मपि हेतुमाह—अणुप्रमाणात्। प्रमाणमिह परिमाणम्। आत्मनोणुपरिमाणत्वादतिसौक्ष्म्यादिन्द्रियग्राह्यत्वाभा-वाच्च तन्न विज्ञेयमिति ॥ ८ ॥

नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ। यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूया-न्नचिकेतः प्रष्टा ॥ ९ ॥

परमकृपालुर्यमः स्वशिष्यं नचिकेतसमविकुण्ठित-कण्ठेन स्तौति निवारयति चानिष्टात्। प्रेष्ठ प्रियतम मया प्रोक्तैषा मतिर्बुद्धिस्तर्केणान्येन तर्कशास्त्राश्रयेण नापनेया न त्यक्तव्या। यदि तर्काश्रयेण मदुपदेशो न प्रमाणितो भवेत्तथापि मदुपदिष्टा मतिरेव सुज्ञानाय समर्था। का तबुद्धिर्नापनेयेत्याह—यां त्वं मत्त आपः प्राप्नोः। बतेति हर्षे। सत्यधृतिरसि। सत्यासत्यं धृतिर्धारणं ज्ञानं यस्य तथाभूतस्त्वमसि। मदुपदिष्टं यत्त्वया धृतं धारयिष्यते च तत्सर्वं सत्यमेव। हे नचिकेत-स्त्वादृक् त्वत्सदृशः प्रष्टा नो भूयान्नैव भवेत्।

जानाम्यहं शेवधिरित्यनित्यं नह्यध्रुवैः प्राप्यते हि ध्रुवं तत्। ततो मया नाचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥

शेवधिर्लौकिकधननिधिः। शेवधिरनित्य इत्यहं जानामि मन्ये। ब्रह्मज्ञानमात्मज्ञानं तु नानित्यम्। एवं चाध्रुवैरनित्यैः साधनैस्तद्ध्रुवं न हि प्राप्यते इत्यपि जानामि। ततस्तस्मादेव मयाचिकेतोग्निर्न चितः। चिकेत इति छान्दसः शब्दः। कित रोगापनयने इतिधातोर्निष्पन्नः। चिकेतो रोगापनेता। रोगा-पनयनं नाम संसाररूपरोगापसारणम्। न चिकेतो-चिकेतः। संसारवर्धकः। संसारवर्धकोग्निर्यागादिर्न चितोनित्यैर्द्रव्यैः। अतएव नित्यं प्राप्तवानस्मि। अनित्यैः साधनैरनित्यस्यैव वस्तुनोवाप्तिः। नित्येन नित्यस्य। अतो मया नाचिकेतोग्निश्चित इति सम्बन्धस्तु असमबद्ध एव। नाचिकेतोग्निस्त्विदानीमेव यमप्रसादादेव नचिकेतसो नाम्ना प्रसिद्धिं गतः। ततः पूर्वं नाचिकेतोग्निर्नासीदेव। कथं तर्हि मया नाचि-केतोग्निश्चित इति। किंच यदि यमः शेवधिरनित्य इति जानाति स्म, अध्रुवैर्ध्रुवं न प्राप्यते स्मेति च जानाति स्म, कथं तर्हि नाचिकेतोग्निश्चितस्तेन? अनित्येन यज्ञेन नित्यफलसाधनं ज्ञानं लभ्यते इति ब्रुवाणो मन्वानश्च भ्रान्त एव। न हि कोपि यज्ञो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानाथ भवति। आपेक्षिकं नित्यं याम्यं प्राप्तवान्स्मीति यमोक्तिमुच्चारयन्नपि कश्चिद्भ्रान्त एव। न ह्यापेक्षिकोपि नित्यो भवति। एवं तु जगदपि नित्यमेव स्यात्। आपेक्षिकं नित्यत्वं तु तत्राप्यस्त्येव। एवं च अनित्यैर्द्रव्यैरित्युक्तिरपि व्यर्था स्यात्। द्रव्येष्वपि विद्यत एवापेक्षिकं नित्यत्वम्। केन दृष्टं पृथिव्यप्तेजांसि कदोत्पन्नानि। को द्रक्ष्यति नाशमेतेषाम्? यद्यत्र पूर्वार्धेन साकं संगतिरपेक्षिता स्यात्तर्हि "यतो मया नाचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्म्यनित्यम्।" इत्येवमुत्तरार्धं पठितव्यं स्यात्। अलमिह काकदन्तपरीक्षया ॥ १० ॥

पुनरपि नचिकेतसं स्तौति—

कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्त्यमभयस्य पारम्। स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा धीरो नचिकेतोत्यस्राक्षीः ॥ ११ ॥

सर्वमसम्बद्धम्। नहि क्रतुना जगत्प्रतिष्ठमानमस्ति। न हि यज्ञात्प्राप्तो लोकोभयस्य पारं भवितुमर्हति। नात्र किञ्चित्तत्त्वम्। भट्टगीतिकेयम् ॥११॥

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥

एतत्सर्वं भट्टगीतिकैव। नचिकेतसा पृष्टमेतद्देहपातानन्तरमात्मा नामास्तीति न वास्तीति। आत्मनोपि मरणं भवति न वेति। एतस्य प्रश्नस्योत्तरमिह नास्ति। अतः सप्तदशश्लोकपर्यन्तं परित्यज्याष्टादशतः प्रारभ्यते ॥ १२ ॥

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे ॥ १८ ॥

अत्र नचिकेतसः प्रश्नस्योत्तरम्—

अयमात्मा न जायते न म्रियते। जनिमृतिमदनित्यं भवति। आत्मा तु न जनिमानित्युच्यते नायं कुतश्चित्कारणाद् बभूवोत्पेदे। कश्चिदित्यधिकः पाठः। अथवा कश्चिदात्मा कुतश्चिन्न बभूवेति योजना कर्तव्या। अथवास्मात् कश्चिन्न बभूव। न जायते न म्रियत इतिप्रतिपादनस्य हेतुमाह श्रुतिः—अजो न जायते इत्यजः। अतएव नित्यः। असन्तुष्टेवाह श्रुतिरयमात्मा शाश्वतः पुराणश्च। नित्यशाश्वतपुराणशब्दैर्नार्थविस्तरः शब्दविस्तरः। यतः स इत्थं ततो हन्यमाने शरीरे मृतेपि हतेपि न हन्यते सः ॥ १८ ॥

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

हन्ता कश्चिन्मन्यन्ते हन्तुमात्मानं विचारयति विचार्य च देवदत्तं हतवान्, ततश्चेन्मन्यते मयात्मा हत इति यो वा देवदत्त हतं मन्यते तावुभौ न विजानीत आत्मानम्। तर्हि कीदृगात्मा? नायं हन्ति कञ्चन नायं हन्यते केनचनेति ॥ १९ ॥

अणोरणीयान्महतो महीयानात्मास्यजन्तोर्निहितो गुहायाम्। तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥२०॥

आत्मतत्त्वमेव विवृणोति। आत्माणोःसूक्ष्मादपि पदार्थात् सूक्ष्मतरो महतश्च महीयान्महत्तरः। अस्य जन्तोः प्राणिन आत्मा गुहायामज्ञातप्रदेशे हृदये वा मनसि वा मस्तिष्के वा निहितः स्थित इत्यर्थः। अक्रतुर्विनिवृत्तसर्वकर्मा यज्ञादिपाशाद्विमुक्तोत एव वीतशोको मयासौ यज्ञः कृतः परमयमवशिष्ट इति चिन्ताचक्राद्विमुक्तो धातुः परमेश्वरस्य प्रसादादात्मनो महिमानं पश्यति। अत्रात्मनो महिमानं पश्यतीत्युक्तं न तु परमात्मनः। एवमवगम्यतेत्रात्मैव निरूपणीयो न परमात्मा। वस्तुतस्तूपनिषत्सु प्रायेणात्मशब्द एव प्रख्यातो व्याप्तश्च। ब्रह्मबोधनायाप्यात्मशब्द एवात्र प्रयुज्यते। आत्मबोधायाप्यात्मशब्दः। एवं च प्रतीयते नास्ति भेद उपनिषद्दृश्यात्मब्रह्मणोः। प्रकरणं चेदं शरीरस्वामिन आत्मन एव न ब्रह्मणः। एवं च धातुरिति षष्ठ्यन्तपाठो न समीचीनतरमञ्चति। ततश्च धातुप्रसादिति समस्तः पाठो मन्तव्यः। धातुशब्दश्च मनोवाचकोत्र। धातोर्मनसः प्रसादात्पावित्र्यादात्मनो महिमानं पश्यतीत्यर्थः। यदार्या नासंस्तत्त्वचिन्तननिपुणास्तदा विविधैर्यज्ञानुष्ठानैः स्वर्गकामा आसन्। यदा ते विचारमाचेरुः शनैः शनैस्तत्त्वमपि निश्चिक्युः। एवं च स्वर्गप्रलोभनेनापगतविवेका विवेकमनुगृह्य नेत्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चोन्मील्य ते ददृशुर्नास्ति स्वर्गाख्या काचन देवानां पुरीति अहमेवात्मनो निबद्धा मोक्ताचाप्यहमेव । असत्कर्मभिर्बन्धनं सत्कर्मभिश्च मुक्तिरिति । इदमेवात्मज्ञानम् । तल्लब्ध्वात्मा वीतशोको भवतीतिभावः ॥ २० ॥

आसीनो दूरं व्रजति शयानो याति सर्वतः । कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ॥ २१ ॥

आत्मानमेव स्तौति । आसीन उपविष्टः स्थितः सन्नपि दूरं व्रजति शयानोपि सुप्तोपि सन् सर्वतो याति सर्वत्र गच्छति । माद्यतीति मदः । न माद्यतीत्यमदः । स देव आत्मा मदोप्यमदोपि । एवं च मदामदं तं देवमात्मानं मदन्यो मत्तोन्यः को ज्ञातुमर्हति ? अहमेव तस्य तात्त्विको विज्ञातेत्याशयो यमस्य । अत्र मन एवात्मेति स्वीकृत्य स्थितस्य शयानस्य च दूरव्रजनमुक्तम् । न हि कुत्रापि व्रजत्यात्मा । "तद्दूरे तदु अन्तिके" इत्यादीनि याजुषाणि वचनान्यनुसन्धेयानि ॥ २१ ॥

"अस्तीत्येके नायमस्तीति चैके" अत्र किं तत्त्वमिति जिज्ञासितं नचिकेतसा । अस्तीति स्वीकृत्यैव यमोपदेशाः प्रावर्तन्त । परं वास्तविकी जिज्ञासा नात्मविषये प्रादुरभूत् । पुनर्जन्मैव सन्दिहानस्य तस्य प्रश्नावतारः । तस्य नास्त्यत्रोत्तरम् । अधुना तु अस्त्यात्मेत्येव विवरीतुं प्रयत्नवान्यमः । तच्च न निरर्थकः परं नातीव सार्थकः । आत्मास्तीति पुनर्जन्माप्यस्त्येवेतिदिशा स्यान्नाम तस्य प्रश्नस्योत्तरम् । परं न तद्धृदयग्राहि । अस्तु यदस्तीह तदेव व्याख्यातव्यम् ।

अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ २२ ॥

स चात्मा स्वयमशरीरोवस्थितश्च । शरीराण्यनवस्थितानि अनवस्थितेषु शरीरेषु स्थितमशरीरं महान्तं महानन्तो यस्य कल्याणस्वरूपमित्यर्थः । विभुं विरुद्धेष्वाकारेषु मनुष्यपशुपक्ष्याद्याकारेषु भवति तिष्ठतीति तमात्मानं मत्वा धीरो विद्वान् न शोचति न विचिकित्सतीत्यर्थः । देहनाशो भवति नात्मनाश इत्युपदेशः ॥ २२ ॥

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ २३ ॥

अयं त्वया विजिज्ञासितः सन्दिधिक्षितो वात्मा न प्रवचनेन शास्त्रोपदेशेन लभ्यो न वा मेधया तीव्रबुद्ध्या न वा बहुना श्रुतेनाधीतेन । तर्हि तल्लाभोपायः क इत्युपदिशति–एष आत्मा यमुपायं वृणुते तेनोपायेन लभ्यः । तल्लाभाय बहवः सन्त्युपायाः स्वयंचिन्तन-विद्वत्समागम–सत्यशीलत्व–रागद्वेषादिराहित्यादयः । एष्वन्येष्वपि यमुपायमुपगृह्यात्मा विचारशाली भवति तेनैवोपायेनात्मानं विजानातीति तत्त्वम् । तस्योपायशीलस्यैष आत्मा स्वां तनूं स्वं रूपं विवृणुते प्रकाशयति । अत्र श्रुतौ मन्ये यम्-एषः-तेन तस्य-स्वांतनूम्-इत्येतानि पदानि सन्देहावहानि प्रकरणमिदमात्मसंश्लिष्टं परमात्मसंश्लिष्टं वेति । तथापि पूर्वस्मादेव प्रवृत्तमात्मप्रकरणं कथमुच्छिद्येत । अग्रेपि नाविरत इतिश्रुतावप्यात्मैव विवृतो न परमात्मा । तत इयमपि श्रुतिरात्मसंबद्धैव न परमात्मसंबद्धेति ॥ २३ ॥

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥

दुश्चरिताद्दुराचाराद्यो नाविरतो नानुपरतो यश्च नाशान्तो नाव्यग्रमना नासमाहितो नेन्द्रियविषयप्रावण्यपरीतो नाशान्तमानसो नोद्विग्नचेताः प्रज्ञानेनापि प्रकृष्टज्ञानेनापि निस्सदिग्धज्ञानेनापि कदाप्येनमात्मानमाप्नुयात् । प्रज्ञानमेव तस्यावाप्तिसाधनम् । परन्तु मनोवशित्वं तत्र सहकारि । उभयं मिलित्वात्मप्रत्यक्षं करोति । आत्मविषयक प्राञ्जलं ज्ञानं तु जातं परन्तु मनोदोषा न निवृत्ताः । मनोदोषा वा निवृत्ताः परं प्राञ्जलं ज्ञानमात्मविषयकं न जातम् । तथापि न न भवत्यात्मज्ञानम् ः आत्मज्ञानायोपायद्वय्यप्यपेक्षितेति । उभयाभावशास्त्रार्थस्य नेहावकाशः ॥ २४ ॥

अप्राकरणिकमप्याह—

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्थावेद वत्र सः ॥२४॥

इति काठकोपनिषदि द्वितीया वल्ली

यस्यात्मनो ब्रह्म ब्राह्मणः क्षत्रं क्षत्रियश्चोभे ओदनो भवतः । ओदनोदनमशनमितियावत् । अयं ब्राह्मणोयं च क्षत्रियोयं वैश्यः शूद्रश्चायमितिविचारो यस्यात्मनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रादुर्भूतस्तिष्ठति, एवम्भूतो यः, यस्योपसेचनं तर्पकं मृत्युर्मरणम्, अयं ब्राह्मणोयं क्षत्रिय इत्यादिरीत्या यो मनुष्येषु पश्यति तस्य मृत्युः पुनर्जन्मानिवार्यम्। इत्थं स मृत्युपाशगृहीतः स को यस्तमात्मानं वेदेति भेदवासनावासितमनसां मृत्युर्दुर्निवार आत्मज्ञानं च दुर्लभमित्याशयः ॥२३॥

इति काठकोपनिषदि प्रथमाध्यायस्य द्वितीयस्यां वल्ल्यां श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-परिव्राजकाचार्य-स्वामिश्रीभगवदाचार्येण निर्मितं काठकोपनिषत्संस्कारभाष्यम्।

अथ काठकोपनिषदि

प्रथमाध्याये तृतीया वल्ली

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥१॥

आम्रान्पृष्टः कोविदारानाचष्टे इत्याख्यानकस्य यमः परमोदाहरणम्। पृष्टोमृत्युर्वदति च ऋतं पिबन्तावित्यादि। नायं नचिकेतसः प्रश्नः। स तु पृच्छति "येयं प्रेते विचिकित्सा मनुष्येस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाहमिति" पुनर्जन्म भवति न वा। आत्मा प्राप्तशरीरस्थायी शरीरान्तरसहचारी वेति प्रश्नस्य हार्दम्। एतद्विषये स्पष्टतो यमो न किञ्चिद्वक्तुमिच्छति। मन्ये तस्यैतद्विषये किमपि स्पष्टं ज्ञानमेव नास्ति। अतएव बहुभिः प्रलोभनैरस्मात्प्रश्नान्नचिकेता निवारितः। स तु परमाग्रहः। "वरस्तु मे वरणीयः स एव' इत्याह पुनः पुनः। यमः किमपि न वक्ति, तद्व्याख्यातार आचार्या अपि किमपि न वदन्ति। सर्वेषां रथा एकेनैव मार्गेण प्रचलन्ति। किमत्र ब्रूमः। भवतु। यथास्थितमेव वयमपि व्याख्यास्यामः। अत्र यमः किं वदितुमिच्छतीति न स्पष्टतरम्। स कथयति-लोके जगति देहे वा सुकृतस्य सुखेन कृतस्य पापस्य वा पुण्यस्य वा ऋतं कर्मफलं पिबन्तौ भुञ्जानौ परमे परार्द्धे उत्कृष्टे हृदयस्थाने गुहां हृदयदेशवर्त्याकाशं प्रविष्टौ प्रविश्य स्थितावित्यर्थः। छायातपौ एकश्छायारूपोपरश्चातपरूपः। एवंभूतो ब्रह्मविदो ब्रह्मवेत्तारो ये ये च पञ्चाग्नयः पञ्च गार्हपत्यो दक्षिणाग्निराहवनीयः सभ्य आवसथ्य इत्येतेग्नयो येषां ते पञ्चाग्नयस्त्रिणाचिकेताश्च वदन्ति। अत्र विशेष्यं कर्म किमिति नोक्तम्। यदि ब्रह्मविद इत्यत्र ब्रह्मेतिपृथक्पदं क्रियते तर्हि तस्यैव कर्मत्वं स्यात्। एवं च द्वावपि ब्रह्म वदन्ति विदो ज्ञानिनः। न केवलं ज्ञानिनः पञ्चाग्नयोपि त्रिणाचिकेता अपि। द्वित्वसंख्यात्राप्रस्तुतैव। पूर्वं सर्वत्रात्मन एवोपवर्णितत्वात्। भवतु। मन्येत्र जीवं ब्रह्म चाधिकृत्य द्विवचनम्। परं यदि ब्रह्मविद इत्यत्र ब्रह्मेति पृथक्पदं स्वीक्रियते तर्हि ब्रह्मैव विशेष्यम्। एवं च विदस्तथाभूतौ द्वावपि ब्रह्म वदन्तीत्यर्थः समायाति। एवं च ब्रह्मापि कर्मफलभोक्तित्युक्तं भवति। नेष्टं च कस्यापि! तथाह्येक ऋतं पिबति नान्य इति सिध्यति कथं तर्हि ऋतं पिबन्ताविति द्विवचनोक्तिः? किंच छायात्वं कुत्रातपत्वं च कुत्रेत्यप्यनिर्णीतमेव। यदि जीवोपि ब्रह्मत्वेनैव स्वीकृतस्तर्हि ऋतं पिबन्ताविति सर्वथानुपपन्नम्। एकं जीवमाच्छिद्य "ऋतं पिबन्" इति प्रतिपाद्यते तर्ह्युपनिषदन्तरं भवति न काठकोपनिषदिति। किं च यदि जोवे छायात्वं ब्रह्मणि चातपत्वं तर्हि कथं जीवे छायात्वमित्यन्यः प्रश्नः समुदेति। नातपस्य छाया भवति, आतपेन हेतुना कस्यचिच्छाया भवति वृक्षच्छायेति मनुष्यच्छायेति च। यदि ब्रह्मातपस्थानीयं तर्हि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथं ब्रह्मणश्छाया स्यात्। ब्रह्महेतुना छाया स्यात्। परं कस्य च्छायेति प्रश्नो निरुत्तर एव तिष्ठति। यदि छायातपाविव विलक्षणौ ताविति व्याख्यायते तर्हीदं विचारणीयं भवति द्वयोर्वैलक्षण्यविज्ञापनायायं प्रयोग उतातपहेतुका छायेति कार्यकारणभावविज्ञापनायेति। यदि वैलक्षण्यविज्ञापनाय तर्हि आतपे छाया भवतीति केवलमधिकरणप्रतीतिः। अथवातपेन छाया भवतीति केवलं करणप्रतीतिः। ब्रह्म न भवत्यधिकरणं न वा भवति करणम्। कथं तर्हि अर्थसंगतिः? अत्र केवलं काकदन्तपरीक्षैवेति निर्णयः॥ १॥

यः सेतुरीजानानामक्षरं ब्रह्म सत्परम्।
अभयं तितीर्षतां पारं नाचिकेतं शकेमहि ॥२॥

ईजानानां यज्ञं कुर्वाणानामपि यः सेतुस्तारकः। सेतुमुद्दिश्य य इति पुंस्त्वम्। यच्चाक्षरमविनाशि, परं ब्रह्म, तदेव पारं संसारस्य तितीर्षतां तरीतुमिच्छतामभयप्रदं तन्नाचिकेतं शकेमहि शक्नुमो ज्ञातुं प्राप्तुं वेतिशेषः। कथं शक्नुमः केन वा शक्नुम इति नोक्तं यममहाराजेन ॥ २॥

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३॥

आत्मानं रथिनं रथस्वामिनं रथारोहिणं विद्धि। शरीरं रथं, बुद्धिं सारथिं, मनः प्रग्रहं रशनां विद्धि। यद्यपि मनोबुद्धिभ्यां सहितमेव शरीरं भवति नातिरिच्येते मनोबुद्धी शरीरात्। तथापि पृथक्कृत्योक्तिः। सद्बुद्धिः बुद्धिर्मनश्च सन्मनः॥ ३॥

इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४॥

तत्र रथे हया इन्द्रियाणि विषया गन्तव्यमार्गाः। आत्मा इन्द्रियाणि मनश्चेति त्रितयं संगत्य भोक्तृत्वं भजते इति मनीषिण आहुः॥ ४॥

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥५॥

यस्तु सारथिरितिभावः। अविज्ञानवान्नैपुण्यविहीनो भवति मनश्च यस्यायुक्तं विषयप्रवणं चञ्चलं वा भवति तस्य रथिन इन्द्रियाणि दुष्टाश्वा इव दुर्दमनीयानि भवन्ति। एवं चेष्टं स्थानं प्राप्यते॥ ६॥

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः।
न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥७॥

पिष्टं पिनष्टि। योविज्ञानवान्भवत्यमनस्कश्चञ्चलमनास्सदाशुचिरपवित्रश्च भवति स तत्पदं स्वाभिलषितं नाप्नोति ततो विरुद्धं संसारमेवाधिगच्छति ॥७॥

यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते॥ ८॥

यश्च विज्ञानवान् भवति तन्मनस्को भवति सर्वदा पवित्रश्च भवति स तत्पदमभिलषितमाप्नोति भूयो न जायते पुनर्जन्म तस्य न भवति। कथञ्चिन्मूलप्रश्नं स्पृशत्यत्र॥ ८॥

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।
सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥९॥

यस्य नरस्य सारथिर्विज्ञानवान् भवति मनश्च प्रगृहीतं भवति। सोध्वनः संसारपथस्य पारमाप्नोति तस्य संसारः समाप्तो भवति। संसारात्परमे विष्णोर्व्यापकस्य तत्परमं पदमवतिष्ठते तत्प्राप्नोतीतिभावः॥ ९॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ १०॥

न हि मनोबुद्धीन्द्रियाण्येवात्मेति वक्तुमाह अर्था विषया इन्द्रियेभ्यः पराः। विषयेभ्यो मनः परम्। मनसस्तु बुद्धिः परा। बुद्धेश्च स महानात्मा परः ॥१०॥

महतः परमव्यक्तमव्यक्तात्पुरुषः परः।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥

महतोव्यक्तादात्मनः परमव्यक्तं यत्स परः पुरुषः। परस्माच्च तस्मात्पुरुषात्किञ्चिन्न परम्। सैव परा काष्ठा सैव परा गतिर्गन्तव्यस्थानम्॥ ११॥

एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यते त्वग्रया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः॥

सर्वभूतेषु सर्वपदार्थेषु सर्वप्राणिषु च एष आत्मा गूढो गुप्तो दृश्योतो न प्रकाशते। परमाग्रया श्रेष्ठया आत्मसंस्कार-संस्कृतबुद्धया स दृश्यते प्रकाश्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूक्ष्मयेति बुद्धिविशेषणम्। तच्च नातीवार्थंकरम्। अग्र्ययेत्यनेनैव विशेषणेन चरितार्थत्वात्। द्रष्टारश्च सूक्ष्मद्रष्टारोपेक्षिताः ॥१२॥

यच्छेद्वाङ् मनसि प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥

प्राज्ञो विशिष्टज्ञानवान् वाग्वाचं मनसि यच्छेन्नियच्छेदित्यर्थः। वागिति द्वितीयार्थे प्रथमा। "मनसी" इति दीर्घपाठोपि। स तु लेखकप्रमादात्। तन्मनश्च ज्ञाने नियच्छेत्। ज्ञानशब्दोत्र बुद्धिवाचकः। अत्र त्रयमात्मपदम्। सर्वत्र सप्तमी विभक्तिः। आत्मनस्त्रीणि विशेषणानि। ज्ञानं महत् शान्तं चेति। ज्ञानमात्मा महानात्मा शान्त आत्मा। व्यर्थैवेयं श्रुतिः। व्यर्थ एवात्र श्रमः। न कश्चिल्लाभः। नात्र किञ्चित्तत्त्वम् ॥१३॥

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ॥१४॥

सर्वापेक्षयात्र क्रियासु बहुवचनप्रयोगः। जीवा उत्तिष्ठत ब्रह्मतत्त्वप्राप्त्यै सन्नद्धा भवत। जाग्रत जागृत मोहनिद्रां दूरं नयत। वरांस्तत्त्वज्ञानिनः प्राप्य निबोधत नितरां बोधत ब्रह्मतत्त्वमात्मतत्त्वं वा। एतत्सर्वं न सुकरम्। किन्तु क्षुरस्य निशितातितीक्ष्णा धारा सा च दुरत्यया दुष्पारा। उत्थानं जागरणं नरप्रापणं वरप्रायणं वरनिबोधनं च न सुकरमितिभावः। तदेव स्पष्टयति—तद्दुर्गं दुर्गमं पथो वर्त्मेति कवयो ज्ञानिनो वदन्ति।

अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥१५॥

तदात्मस्वरूपं निचाय्य निश्चित्य मृत्युमुखात्प्रमुच्यते। ततः परं जन्ममरणयोरन्तो भवति। कीदृशं तदात्मस्वरूपम्? आह। अशब्दं शब्देनाप्रत्याय्यम्। अस्पर्शं न स्पर्शो यत्र, स्प्रष्टुमनर्हमित्यर्थः। अरूपं रूपरहितं दृगगोचरम्। अव्ययमविकारि। अरसं रसरहितम्। ननु रसो वै स इतिश्रुत्यन्तरे श्रूयते कथं तर्ह्यरस इति। सत्यम् इह जलीयशरीरनिषेधः। अगन्धवच्च यत्। अनेन गन्धो निषिद्धः। शरीराभावादेव शरीरधर्मो निषिध्यते। तच्चानादि, अनन्तं महतोपि परं व्यापकमित्यर्थः। ध्रुवमविचलमविकार्यम्। इत्थंभूतमात्मस्वरूपं निचाय्य मृत्युमुखात्प्रमुक्तो भवति सर्वः ॥१५॥

एतदुपाख्यानस्य फलं श्रावयति—

नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्।
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥
य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि।
प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते
तदानन्त्याय कल्पत इति ॥ १७ ॥

इति श्रीकाठकोपनिषदि प्रथमाध्याये तृतीया वल्ली

इति काठकोपनिषदि प्रथमाध्यायस्य तृतीयस्यां वल्ल्यां
काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंस-परिव्राजकाचार्य-स्वामि-श्रीभगवदाचार्येण
निर्मितं काठकोपनिषत्संस्कारभाष्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ काठकोपनिषदि

द्वितीयाध्याये प्रथमा वल्ली

एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते, दृश्यते त्वग्रया बुद्धयेत्याद्युक्त्वोत्तिष्ठत जाग्रत प्राप्य वरान्निबोधतेत्याद्यादिश्य क्षुरस्य धारा निशितेत्यादिना ब्रह्मवर्त्मनो दुरतिक्रम्यत्वं विद्वद्भिस्तद्वेद्यत्वं चोपपाद्येदानीं पुनस्तद्वेत्तृवर्गस्वरूपप्रकाशनाय भगवती श्रुतिरजिह्मात्मजिह्वामान्दोलयति—

पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥ १॥

स्वयम्भूः स्वयमेवानेकानि रूपाणि समादाय जंगदक्षिप्रत्यक्षतामात्मानमुपनयन्परमात्मा खानीन्द्रियाणि। खमाकाशः । आकाशतत्त्वप्रधानमिन्द्रियं श्रोत्रम्। खशब्देन प्राधान्येन श्रोत्रेन्द्रियस्यैव ग्रहणम्। लक्षणया च निखिलेन्द्रियाणां बोधनम्। अथवा खनु अवदारणे। उः। खनतीति विग्रहः। खननमवदारणम्। अवदारणं विनाशः। इन्द्रियाणि विषयसमाजं नीत्वात्मानं विषयबद्धं कुर्वन्ति। विषयबद्धतैव नित्यस्यात्मनोवदारणम्। अथवा खै दाने। घञर्थे कः। इन्द्रियाण्येवात्मने विषयान्प्रयच्छन्ति। अथवा खै स्थैर्ये हिंसायां च। अतिस्थिराणि हीन्द्रियाणि भवन्ति। अतएव बलवानिन्द्रियग्राम इति मनुनाप्युक्तम्। इन्द्रियाणी प्रमाथीनीतिभगवतापि समर्थितम्। इन्द्रियाणां हिंसाकारित्वं चोपरि प्रदर्शितेनावदारणनयेन समर्थनीयम्। पराञ्चि परप्रकाशकानि। परानञ्चतीति विग्रहः। आत्मव्यतिरिक्तानामेव पदार्थानां प्रदर्शने सामर्थ्यमिन्द्रियाणामिति तेषां पराक्त्वम्। व्यतृणदुदपादयत्। हिंसार्थकस्य तृहधातोरुत्पादनार्थप्रकाशने धातूनामनेकार्थतैव शरणम्। तस्मादिन्द्रियाणां पराक्त्वाद्धेतोर्लोक इति कर्तृपदमध्याहार्यम्। पराङ् पराचीनात्मभूतानेव पदार्थान्पश्यति गृह्णाति। अनात्मभूतजागत्कपदार्थप्रवणो भवतीत्यर्थः। पराङित्यत्र विभक्तिवचनयोरौपनिषदो व्यत्ययः। न अन्तरात्मन् प्रत्यगात्मानं न पश्यतीतियोज्यम्। अन्तरात्मन्नित्यत्र विभक्तिलोप औपनिषदः आवृत्तचक्षुरिन्द्रियार्थसुखानपेक्षी। इन्द्रियार्थानां ग्रहणं इन्द्रियाण्येव हेतुः। यस्येन्द्रियाणामिन्द्रियार्थग्रहणहेतुता यमनियमादिभिरपाकृता भवति स आवृत्तचक्षुरित्युच्यते। यस्येन्द्रियाणि स्वार्थग्रहणाकुशलानि भवन्ति स चेन्द्रियसुखानपेक्षी भवत्येवेति तथा व्याख्यातम्। चक्षुः शब्दोत्रेन्द्रियसामान्यवाचकः। चक्षिङ्धातोर्निःष्पन्नोयं शब्दः। सर्वाण्येवेन्द्रियाणि स्वविषयान्व्यक्तमेवाददत इति सर्वाण्येव तानि चक्षुर्वाच्यानि। अथवा प्रतीघातार्थक-चकधातोस्तृप्त्यर्थक-चकधातोर्वा निष्पादनीयश्चक्षुःशब्दः। आत्मानं विषयप्रवणं विधाय प्रतीघातमेव जनयन्ति सर्वाण्येवेन्द्रियाणि। इन्द्रियार्थेभ्य एव तेषां तृप्तिश्च भवति। अथवा पीडार्थकचक्कधातोर्निष्पाद्यतां चक्षुः। पीडयन्त्येव तानि बलेनात्मानम्। अमृतत्वममरणधर्मत्वमात्मन इति शेषः। मोक्षमितियावत्। इच्छन्समीहमानः कश्चिद्विरलो धीरो मेधावी। वैदिकनिघण्टौ धीरशब्दो मेधाविनामसु पठितः। प्रत्यगात्मानं प्रत्यञ्चं मुख्यमहमर्थरूपमात्मानमैक्षत्पश्यतीत्यर्थः। स्वतन्त्रा हि भगवती श्रुतिर्व्याकरणादिपारतन्त्र्यं मनागपि न स्पृशति। अतएव वर्तमानेप्यर्थे भूतार्थविधायिनं लङ्मात्मनेपदितां च निराकृत्य परस्मैपदितां चाकामयत। इदमत्र तत्त्वम्। सर्वाण्येव भौतिकेन्द्रियाणि भौतिकानामेव पदार्थानां ग्रहणे समर्थानि विषयप्रवण इन्द्रियाधीन आत्मा स्वरूपमवगतुं नार्हति। अमृताभिलाषी निवृत्तेन्द्रियार्थग्राम एव तथा कर्तुं समर्थः। परमेतादृशो धीरस्तु विरल एव॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सांसारिकविषयाधिजिगमिषूणां जाड्यं प्रतिपादयन्धीरस्वरूपं प्रतिपादयति यमः —

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्। अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥

बालाः सारासारविचारदुर्बलाः पराचः सांसारिकानेव कामान्विषयाननुयन्त्यनुगच्छन्ति । ते बाला विततस्य सर्वस्मिन्देशे सर्वस्मिन्काले च वर्तमानस्य मृत्योरविद्यात्मकविनाशस्य पाशं जालं वशमितियावत्। यन्ति प्राप्नुवन्ति। अथ धीरा-धीराश्च। चकारार्थकोत्राथशब्दः। धीरो निरुक्तार्थः। अमृतत्वं मोक्षं ध्रुवं नित्यं विदित्वा विज्ञायेह संसारेऽध्रुवेषु विनाशशीलेषु परिणामशीलेषु वा पदार्थेषु कञ्चिदपीतिशेषः। न प्रार्थयन्ते नाभिलषन्ति। अयमभिप्रायः मृत्युर्ह्यत्राविद्यैव। न मरणं न वा यमः। बालानामबालानामपि शरीरत्यागस्तु नियत एव। शरीरत्याग एव मरणम्। तर्हि विशिष्य बालपदग्रहणं निष्प्रयोजनतां व्रजेत्। यमाधीनतापि सर्वेषां समाना। ज्ञानसमृद्धय एव मानवशरीरम्। स्वात्मानुभवविरहिता आत्मानः पौनःपुन्येनाज्ञानगर्तमेव पतन्ति। एवं च स्वानुभवानवधानत्वं हि बालस्वरूपम्। द्वितीयार्धेन धीरस्वरूपमाह। अध्रुवो हि संसार इति मत्वा सांसारिकेभ्यो विषयेभ्यो पराङ्मुखाऽमृतत्वं कामयमाना अनुकूलवर्त्मना प्रयाणकुशला ये ते धीराः।

आत्मस्वरूपं परिचाययितुमाह —

येन रूपं रसं गन्धं शब्दान्स्पर्शाश्च मैथुनान्। एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तत् ।

येनैतेन हेतुना लोको रूपं रसं गन्धं शब्दान्स्पर्शानन्यान्मैथुनान्हर्षशोक-रागद्वेष–कामक्रोधादीन्विजानाति तदेतन्मन एव तत् आत्मतत्त्वम्। तज्ज्ञानान्तरं किमत्र विज्ञातुं परिशिष्यते ? न किमपीत्यर्थः अत्रावश्यं मनोनिरूपणम् रूपरसादीनां ज्ञानं तत्तदिन्द्रियेण भवतीति तु सत्यम्। परं मन एव तत्र प्रधानं साधनम्। मनसोभावे सत्स्वपीन्द्रियेषु न भवति पदार्थोपलब्धिः। सत्यप्यात्मनि स्वप्ने सुषुप्तौ वा न भवति बाह्यपदार्थोपलब्धिः। अतएव मन एव रूपरसादीनां ग्रहणे प्रधानं हेतुः। चक्षूरसनादीनां तु करणत्वम्। मन एवात्मेत्यत्र सूचितम् ॥ ३ ॥

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति। महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ४ ॥

येन हेतुना लोको स्वप्नान्तं स्वप्नप्रत्येयं जागरितान्तं जाग्रत्प्रत्येयमिदमुभयं लोकोनुपश्यति तन्महान्तं महत् विभुं विभु आत्मानं मनो मत्वा ज्ञात्वा धीरो न शोचति। स्वप्नावस्थायां जाग्रदवस्थायां च यत्किञ्चित्कृतमनुभूतं च भवति तत्सर्वं मनसैव विज्ञातं भवति। ज्ञानसाधनं मन एव नान्यत्। आत्मशब्दो मनोवाचकोपि। आत्मशब्दमुद्दिश्यैव महान्तं विभुमित्यत्र पुंस्त्वम्। मन एव मनुष्याणां कारणं बन्धमोक्षयोरिति विज्ञाय धीरो न शोचति। मनसैव सुखसाधनं दुःखसाधनं च समूहितम्। तेनैव सुखं दुःखं चानुभाव्यम्। एवं विज्ञायात्मा न शोचति ॥ ४ ॥

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्। ईशानो भूतभव्यस्य न ततो विजुगुप्सते। एतद्वैतत् ॥ ५ ॥

मध्वत्तीति मध्वदः। मधु कर्मफलम्। यो महापुरुष इदं मध्वदमात्मानं मनोन्तिकात्समीपाद्याथार्थ्येनेत्यर्थो वेद जानाति स भूतभव्यस्य भूतस्य भविष्यतश्च वर्तमानस्येत्यध्याहार्यम्। वस्तुतस्तु बहूनां मते वर्तमानं किञ्चिन्नास्त्येव। जायमानं क्षणमेकं तिष्ठति जातं भूतं च स्थायि। भविष्यतोपि वर्तमानस्येव क्षणस्थायि। एवं च भूतमेवावशिष्यते। परं वर्तमानापेक्षया भविष्यतश्चिरस्थायित्वाद्भूतभव्यस्येत्युक्तिः। ईशानो भवति स्वामित्वं धत्ते। ततो न विजुगुप्सते नात्मानं निन्दति मयेदं सुकृतमिति दुष्कृतमिति च। एतद्वैतत्। अत्रैतच्छब्देनात्मोक्तः। कठस्य नास्ति चिन्ता "एतद्वैतत्" इतिपदयोः कुत्र कथं केन सम्बन्धो भवतीति। पूर्वस्यां श्रुतावेतच्छब्दस्य मनसा सम्बन्धः। नात्मना। एतेनावगम्यते उपनिषदृषीणामात्मविषये नासीत्कश्चन निश्चय इति ॥ ५ ॥

यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत। गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत। एतद्वैतत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्तपसोग्नेः पूर्वं जातं जातः। अद्भ्यश्च यः पूर्वमजायत गुहां शरीराभ्यन्तरे प्रविश्य तिष्ठन्तं तिष्ठन् यो भूतेभिः प्राणिभिर्मनुष्यैर्व्यपश्यत व्यदृश्यतावगतस्तद्ब्रह्म। अत्र जीव एव ब्रह्मेत्युक्तम् ॥ ६ ॥

या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वैतत् ॥ ७ ॥

यादितिरविनाशिनी देवतामयी देवता प्राणेन सहैव संभवत्युत्पद्यते गुहां शरीरान्तर्देशं च प्रविश्य तिष्ठन्तीं तिष्ठतीत्यर्थः। या न केवलं प्राणेन सह भूतेभिरिन्द्रियैः सहापि व्यजायत। देहेन सहैव चैतन्यमपि जायते इतिभावः ॥ ७ ॥

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः। दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः॥ एतद्वैतत् ॥ ८ ॥

निस्तत्त्वैषा श्रुतिः ॥ ८ ॥

यतश्चोदेति सूर्योस्तं यत्र च गच्छति। तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन॥ एतद्वै तत् ॥ ९ ॥

यतः सूर्य उदेति यत्र च सोस्तं गच्छति तं तस्मिन् ब्रह्मदेवे सर्वे देवा इन्द्रियाणि पदार्थाश्चार्पिताः स्थिताः। तद् उ कश्चन नात्येति नातिक्राम्यति। एतद्वै तद्ब्रह्म ॥ ९ ॥

यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

इहात्र यत्तत्त्वमनुभूयते तदेवामुत्रादृश्ये लोकेपि। यच्चामुत्र तदनु तदेवेह। न कश्चन भेदः। यश्चेहोभयत्र प्रतीयमाने तत्त्वे नाना इव भेदमिव पश्यति स मृत्योर्मृत्युमाप्नोति जन्ममरणबन्धं प्राप्नोति। अत्र सर्वं ब्रह्मैवेति प्रतिपादितम्। जीवब्रह्मणोर्भेदो निरस्तः ॥१०॥

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति॥

इदमत्र तत्र प्रतीयमानं वेदनीयं वा मनसैवाप्तव्यं मनोतिरिक्तं तत्प्राप्तेर्नान्यत्साधनम्। अनेक जपयज्ञादयो निषिद्धाः। मृत्योः स इत्यादि व्याख्यातम् ॥ ११ ॥

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानं भूतभव्यस्य न ततो विजुगुप्सते॥ एतद्वैतत् ॥

अङ्गुष्ठपरिमाणं हृदयमिति वैदिकसंवादः। तत्र स्थितः पुरुषोपि तथैवोपचर्य्यते। आत्मनि मध्ये हृदयमध्ये स पुरुषस्तिष्ठति स एव भूतभव्यस्येशानः। ततो न कश्चिद्विजुगुप्सते। एतद् वै तत्। नात्र किञ्चित्तिरोहितम् ॥ १२ ॥

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वैतत् ॥

सचाङ्गुष्ठमात्रः पुरुषोधूमकं ज्योतिरिवाग्निरिव। प्रकाशस्वरूप इत्यर्थः। भूतभव्यस्य चेशान ईशनकर्ता स एवाद्यास्ति स एव च श्वो भविष्यति। नहि भाविनः ईशिता कश्चिदन्यः। योद्य शास्ति स एव श्वोपि शासिष्यति। एतद्वै तद् ब्रह्म ॥ १३ ॥

यदोदकं दुर्गे वृष्टं पर्वतेषु विधावति।
एवं धर्मान्पृथक्पश्यंस्तानेवानुधावति ॥ १४ ॥

यथा दुर्गे विषमस्थले वृष्टमुदकं पर्वतेषु विधावति, अथवा यथा पर्वतेषु वृष्टमुदकं दुर्गे विधावत्यरण्यादिषु। दुर्गे वा वृष्टं स्यात्पर्वते वा जलं तु तदेव। नास्ति तत्र भेदः। तान् धर्मानाचारान् पृथक् पश्यन्नाचरन्नपि जीवात्मा तदेव ब्रह्मेवानुधावति। यथा वनेषु वा गिरिषु वान्यत्र वा वृष्टं जलं न भवति भिन्नं केवलमाधारस्य भिन्नतया भिन्नत्वं प्रतीयते। एवं स्वभावानुसारेण पृथक् पृथक् भिन्नभिन्नानाचारानाचरन्नपि जीवस्तदेवानुधावति। न भवति भेदभागिति ॥ १४ ॥

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥

यथा शुद्धे स्थले आसिक्तं जलं तादृगेव शुद्धमेव भवति। एवं मुनेर्मननशीलस्य विजानतो ज्ञानिन आत्मा भवत हे गौतम। इदमत्रोक्तं भवति–शुद्धे स्थाने आसिक्तं जलं शुद्धं भवति, अशुद्धे च स्थाने सिक्तं तदेवाशुद्धं भवति। पात्रे भेदो न जले। जलं तूभयत्रैकरूपमेव। एवमात्मापि शुद्धमाचरन् शुद्धो भवत्यशुद्धमाचरन्नशुद्धो भवति। तस्य शुद्धयशुद्धयोराचारः कारणं नान्यत्। स्वभावतस्तु स शुद्ध एवेति ॥ १५ ॥

इति श्रीकाठकोपनिषदि द्वितीयाध्याये प्रथमा वल्ली समाप्ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ काठकोपनिषदि

द्वितीयाध्याये द्वितीया वल्ली

प्रकृतं ब्रह्मैव। उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इतिन्यायेन येन केनापि प्रकारेण ब्रह्मस्वरूपापरपर्यायस्वस्वरूपं स्वरूपापरपर्यायब्रह्मस्वरूपमधिगत्यैव सर्वदुःखनिवृत्तिरित्याह—

पुरमेकादशद्वारमजस्यावक्रचेतसः। अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते एतद्वै तत् ॥ १ ॥

अजस्यावक्रचेतस इत्यत्र प्रथमार्था षष्ठी। अवक्रचेताः परमर्जुमतिरजोजन्मा एकादश द्वाराणि यत्र तत्पुरं शरीरमनुष्ठाय स्वार्थे परार्थे चापि विनियुज्य न शोचति मुक्तश्च भवति सर्वदुःखसमाजात्। विमुच्यते च ततः परं सार्वदिकी मुक्तिर्भवति। न पुनर्जन्म न पुनर्मृत्युरिति। मुक्तः को भवतीति श्रुत्योपदिश्यते। अवक्रचेतसामेव मुक्तिरितिसिद्धान्तः। कामक्रोधलोभमदमोहमात्सर्यादिभिर्दू रोगैश्चेतो वक्रं भवति। वक्रचेतसां सविधे समवस्थानमपि महते दुःखाय भवति तेषां संसर्गेण महानर्थकरो दुरवेक्षणीयो मानसिकः सर्गः संजायते। स च सर्वथा सर्वदा च खेदकर एव। अतो न केवलं वक्रचेतसामेव न मुक्तिरपि तु तत्संसर्गजुषामपि नेति विभावनीयम्। अतो योवक्रचेताः स्वानीन्द्रियाणि स्वीयं च देहं परोपकारे विनियुज्य परमार्थं समर्थयते स एव प्रारब्धकर्मावसाने नानाभवानुभूतभवीयसम्बन्धरहितो भूत्वा कृती भवति। यश्च देहेन्द्रियाणि केवलं भवीयभोगानुभवायैव संवर्धयति न चानुचिन्तयति परमार्थं स पुनः पुनर्भवमेवापद्यते तज्जन्यशोकानलज्वालामालाभिर्दन्दह्यते चेति तात्पर्यम् ॥ १ ॥

परमात्मनः सर्वव्यापकत्वं सर्वात्मत्वं च द्रढयति—

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २ ॥

विशेषणमुखेनात्मानं स्तौति। हंसो हन्ति सर्वत्र गच्छति सर्वान् दुर्गुणान्हिस्तीति वा हंसः। शुचिषद् शुचिषु पवित्रेषु तिष्ठति सः। वसुर्वासयति सर्वान्सः। अन्तरिक्षसद्धृदयदेशे निवासकृदाकाशनिवासकृद्वा होता सर्वकर्मफलप्रदाता। हु दानादनयोः। वेदिषत् वेदिः पृथिवी तत्र तिष्ठतीति सः। अतिथिर्न तिथिर्यस्य सः। ब्रह्मणो नास्ति कश्चित्तिथिः सार्वदिकत्वान्नित्यत्वाद्वा। दुरोणासद् दुरोणं गृहं तत्र सीदतीति। अथवा दुःखेनावनं रक्षणं यस्य स दुरोणो दरिद्रस्तत्र सीदतीति। दुःशब्दपूर्वकस्यावते रक्षणार्थस्य ल्युटि सम्प्रसारणम्। आद्गुणश्च। नृषु सीदतीति नृषद्। वरेषु तिष्ठतीति वरसद्। ऋते सत्ये तिष्ठतीति ऋतसद्। व्योम्नि सीदतीति व्योमसद्। अप्सु जायते प्रादुर्भवतीत्यब्जाः। गवि पृथिव्यां विविधै रूपैर्जायत इति गोजाः। ऋतं सत्यम्। तदस्ति यस्य स ऋतस्तत्र जायत इत्यृतजाः। अद्रिषु न दीर्यन्ते तेषु पर्वतादिषु जायत इत्यद्रिजाः। ऋतं सत्यम्। बृहत् महत्। ईदृशमात्मतत्त्वम्। अनेकै रूपैस्तत्प्राकट्यं धत्ते ॥ २ ॥

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति। मध्ये वामनमासीनं विश्वे देवा उपासते ॥ ३ ॥

अत्र स्पष्टतया जीवस्यैव वर्णनम्। जीवो यदा शरीरस्वामित्वेन शरीरेवस्थितो भवति तदा प्राणं प्राणवायुमूर्ध्वमुन्नयति प्रेरयत्यपानमपानवायुं प्रत्यगघोस्यति क्षिपति। व्यानसमानोदानादिवायूनां विषयेप्येवमेव बोध्यम्। मध्ये शरीरमध्ये वामनं संभजनीयमथवा सुन्दरं यथा स्यात्तथासीनमवस्थितं जीवं विश्वेदेवा इन्द्रियादिरूपा उपासते सम्मानयन्ति। जीवाधीनव्यापारा भवन्तीत्याशयः। यदि परमात्मैवेहापि स्यादिष्टस्तदा तमधिकृत्य व्याख्यानं कार्यम् ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नचिकेतसो हृदयं तु नाद्यावधि सन्तुष्टम्। स तु केवलं मरणोत्तरं किं भवतीत्येव जिज्ञासते स्म। अतः पुनरेव शरीरत्यागानन्तरं जीवस्य का स्थितिरिति स्पष्टमवगन्तुं पुनः स्वशङ्कामवतारयति—

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः। देहाद्विमुच्यमानस्य किमत्र परिशिष्यते। एतद्वै तत् ॥

यस्य शरीरस्थस्य देहिन आत्मनो विस्रंसमानस्य मृतस्य देहाद्विमुच्यमानस्यानन्तरं किमत्र परिशिष्यते। एतद्वै तन्मदीयं प्रष्टव्यम्। एतद्वाक्यखण्डमनियत-व्याख्यानं वेदितव्यम् ॥ ४ ॥

देहाद्विमुच्यमानस्य किमत्र परिशिष्यत इत्येकं प्रश्नं परिसमाप्यापरमुत्थापयति कुशलः शिष्यो नचिकेताः—

न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥

भगवन्यद्युच्येत प्राणापानादय एव शरीरं धारयन्ति निर्गतेषु च तेषु शरीरं निर्जीवं भवतीति तन्न मया स्वीकार्यम्। न हि प्राणादिभिः कश्चन मर्त्यो जीवो जीवति। किं तर्हि ? इतरेण तु अन्येनैव जीवन्ति। किं तदितरत् ? यस्मिन्सत्येतौ प्राणापानावुपाश्रितौ। तदेव मया जिज्ञास्यते ॥ ५ ॥

हर्षाधीनो यमस्तत्त्वमवबोधयितुं सोत्साहं प्रति-जानीते—

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्। यथा च मरणं प्राप्य आत्मा भवति गौतम ॥ ६ ॥

हन्तेति हर्षे। शिष्येदं गुह्यं सनातनमनादि ब्रह्म तत्त्वं ते प्रवक्ष्यामि। मरणं प्राप्य स आत्मा हे गौतम यथा भवति। अत्रात्मन एव मरणमुक्तम्। यद्यात्मा शरीरं तर्हि तस्य मरणानन्तरं भस्मान्त शरीरमिति सिद्धान्तान्न किञ्चिदन्यद्भवति। उपनिषदां समीपे वास्ति शब्दराशिर्नवा मरणानन्तरं किं भवति को वा म्रियते नित्य आत्मा न वेत्यादीनां प्रश्नानां स्पष्ट-मुत्तरम्। अतः क्वचिदन्यत्क्वचिच्चान्यद्ब्रुवन्ति। गुह्यं ब्रह्मेत्यत्र ब्रह्मशब्देन चिद्ब्रह्म न गृह्यते। तद्विषये प्रश्नस्यैवाभावात्। अथवा ब्रह्मात्मशब्दयोः पर्याय-त्वात्पूर्वं ब्रह्मेति पश्चादात्मेत्युच्चारितम् ॥ ६ ॥

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणु-मन्ये नु संयन्ति यथाकर्म यथाश्रुतम् ॥ ७ ॥

अन्ये केचन देहिनो देहाध्यक्षाः शरीरत्वाय यथाकर्म कर्मानतिक्रम्य यथाश्रुतं श्रुतमनतिक्रम्य योनिं प्राणि-योनिं प्रपद्यन्ते। अन्ये तु येषां नास्ति श्रुतमस्ति च केवलं कर्म ते स्थाणुं जडत्वं संयान्ति प्राप्नुवन्ति। उपनिषदोद्यापि न स्पष्टाः स्पष्टं वक्तुं कीदृक्कर्म कीदृशं योनिं प्रापयतीति। एवं कीदृशं कियद्वा श्रुतं कीदृशीं योनिं प्रापयतीति। कीदृशं च कर्म जडयोनिं प्रापयतीति। अत्र बहु वक्तव्यम्। जीवाश्चतुरशीति-लक्षसंख्याका योनीरतिक्रम्य महता कालेन महता च श्रमेण मानवीं तनुमधिगच्छन्तीति सर्वसम्मतः पन्थाः। अतिक्रान्तासु योनिषु न जीवानां पुनर्ग-मनम्। मनुष्यशरीरं मोक्षद्वारमित्युच्यते। एवं च स्थाणु शब्देनास्यां श्रुतौ वृक्षादीनां ग्रहणं नितराम-तिनिन्द्यम्। व्याघातात्। नहि मनुष्ययोनिमधिगत्य विद्यां कर्माणि वा सम्पाद्य कश्चनाधमां योनिं गन्तुमर्हति। न हि कोप्यधमोपि, मनुष्योनिं प्राप्य तिर्यगादियोनिप्रापकाणि कर्माणि कर्तुं शक्तिमनुसन्द-धाति। यदि कस्यापि निकृष्टं कर्म तर्हि जन्मान्तरे स निकृष्टो मनुष्यो भविष्यति। यदि निकृष्टतरं निकृष्टतमं वा कर्म तर्हि स निकृष्टतरो निकृष्टतमो वा मनुष्य एव भविष्यति न पश्वादिर्न वृक्षादिः। अतः स्थाणुशब्दोत्र परब्रह्मवाचकः। ननु सर्वे उपनिषद्भाष्यकाराः कुप्येयुः। कुप्यन्तु नाम। का नो हानिः। सत्यं समीहमानस्या-चरतो वा सत्यं न भवति भीर्बाधिका। भ्रमस्तु न शुद्धब्रह्मातिरिक्तस्य कस्यापि दयते। न च वाच्यमिदं व्याख्यानं "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा। अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं सूकरयोनिं वा चण्डालयोनिं वा" इति छान्दोग्यश्रुतिं विरुणद्धीति। अस्मत्प्रतिपादितार्थ एवैतस्या अपि तात्पर्यस्योन्नेयत्वात्। तथा हि रमणीयचरणानां ब्राह्मणयोनिः क्षत्रिय-योनिर्वैश्ययोनिश्च प्रतिपादिता। कथमेतत्संभवति। यदि समाना एव रमणीयाचारास्तेषां तर्हि ब्राह्मण-योनिरेव स्यात्क्षत्रिययोनिरेव स्याद्वैश्ययोनिरेव वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यात्। समानाचाराणां योनिवैषम्यं तु न घटते। एवं च रमणीयाचरणेषु किञ्चित्कथमपि तारतम्यं तु स्वीकर्तव्यमेव। तथा चायं निष्कर्षः स्यात्। ये च रमणीयचरणतमास्तेषां ब्राह्मणयोनिः। ये च रमणीयचरणतरास्तेषां क्षत्रिययोनिः। ये च रमणीयचरणास्तेषां वैश्ययोनिः। ये च शूद्रा ये च वेदावमानिनः शर्मण्यहूणादयो महाविद्वांसस्तेषां योनिः केतिप्रतिपादनमवशिष्टम्। अस्यां श्रुतौ कपूयाचरणानां श्वयोनिं सूकरयोनिं चण्डालयोनिं च श्रुत्वा मनुष्ययोनेः पश्वादियोनिगमनं समर्थयन्ते बहवः। तदसमञ्जसमेव। न हि मनुष्ययोनिं प्राप्तानां मरणानन्तरं निकृष्टयोनिगमनं बुद्धिः समर्थयते। भवतु। अस्याश्छान्दोग्यश्रुतेरर्थो विचारणीयः। अन्ते श्रुतौ चण्डालयोनिं वेति श्रूयते। ततः पूर्वं श्वयोनिं वा सूकरयोनिं वेति च श्रूयते। न हि चण्डालयोनिस्था मानवा श्वयोन्यपेक्षया सूकरयोन्यपेक्षया वापि निकृष्टा येन चण्डालयोनिपरिगणनं श्वसूकराभ्यां परस्तादौचित्यमावहेत। यथा तथा वा मनुष्ययोनिः पश्वादियोन्यपेक्षया श्रेष्ठैव सर्वविद्वत्सम्मता। तथा चायं श्रुतौ क्रमभङ्गो विचारभङ्ग एव। तथा च श्वसूकरशब्दावन्यथा व्याख्येयौ। केवलपिण्डाशयात्समानमवमत्यावमननीयामपि पर मतिमनुमन्वानो मन्दमतिर्मनुष्यः श्वशब्देनोच्यते। एवमेव सूकरशब्देनापि सू इति शब्दं कुर्वाणो निरर्थकमितस्ततोऽन्यः कोपि विज्ञानविहीनो मनुष्य उच्यते। स चापि शूद्र एव। एवं च ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं प्रतिपद्य तदन्ते चण्डालयोनिप्रतिपादनं नानौचित्यं धत्ते। एवं चानया श्रुत्याप्यन्ते मानवयोनिगमनमेव प्रतिपाद्यते न पश्वादियोनिगमनम्; अमुमेवार्थं "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञाच" इति श्रुतिः समर्थयते। विद्या कर्म पूर्ववासनाचेति त्रितयं मृत्युमाप्नुवतः पुरुषस्य सहयायि भवति। एतस्मिन्मानुष्ये जन्मनि समर्जिता विद्या कृतं कर्म संचिता च वासना परस्मिन्नपि मनुष्यजन्मन्येवानुवर्तन्ते न पश्वादि जन्मनीतिप्रतिपादितं भवतीति। केचन मनुष्यदेहत्यागानन्तरं यथाविद्यं यथाकर्म यथावासनं च जीवः पश्वादियोनिष्वपि गच्छतीत्यस्याः श्रुतेराशयमुपवर्णयन्ति। तदसत्। सर्वथैवोपेक्षणीयायां पश्वादियोनिप्रापककर्मपरम्परायां प्राप्तायां च मनुष्ययोन्यां न पुनः पश्चात्प्रतिगमनस्य किमपि कारणं पश्यामः। अत इयं बृहदारण्यकश्रुतिरपि मनुष्ययोनिविषयिण्येवेति वेदितव्यम्॥ ७॥

अतिकौतूहलकारणं प्रश्नं तदुत्तरं च स्वेच्छया परिसमाप्य स्वयमेवोत्थापितं ब्रह्मस्वरूपं निरूपयति—

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिल्लँयोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वै तत्॥ ८॥

सुप्तेष्विन्द्रियादिषु कामं कामं तं तमभिलषितपदार्थं निर्मिमाणो विरचयन्य एष जागर्ति तदेव शुक्रं दीप्तं ब्रह्मोच्यते तदेव चामृतमुच्यते। सर्वे लोकास्तस्मिञ्छ्रिताः। कश्चनापि तत्रात्येति एतद्वै तद्ब्रह्म॥ ८॥

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥ ९॥

यथैव एवाग्निर्भुवनं भवत्युत्पद्यते यस्मिन्यस्माद्वातत्काष्ठादि। प्रविष्टो रूपं रूपं प्रति काष्ठलोहादि प्रति प्रतिरूपो बभूव यस्मिन्दाह्ये वस्तुनि स प्रविष्टः प्रज्वलितो वा तद्रूपो भवति। तथैकः सर्वभूतान्तरात्मा रूपं रूपं मनुष्यपशुकीटपतङ्गादिषु प्रविष्टः सन् प्रतिरूपो भवति तत्तद्रूपो भवति तथापि बहिश्च भवति। अग्नौ प्रविष्टोऽग्निरूपमपि भवति तथाग्नेर्बहिरपि तिष्ठति। उक्तमेवार्थं बहुवादिनी श्रुतिः पुनः पुनर्ब्रवीति॥ ९॥

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥ १०॥

एक एव वायुर्यथा यत्र प्रविष्टस्तत्र ताद्रूप्यं धत्ते तथैवान्तरात्मापि वेदितव्यः॥ १०॥

यद्येवं तर्हि तत्तत्पदार्थेषु स्थित आत्मा तत्तत्पदार्थगुणदोषैरप्यवलिप्येतेति शङ्कमानं प्रत्याह—

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः॥ ११॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूर्यो यथा सर्वलोकस्य चक्षुः प्रकाशको भवन्नपि चाक्षुषैर्बाह्यदोषैर्न लिप्यते। बहवो दोषा मन्ददर्शन-मन्दतरदर्शनमन्दतमदर्शनरूपा ह्रस्वत्वदीर्घत्वादयो क्षिकण्टकादयश्च भवन्ति परं सूर्यश्चक्षुस्तत्तदोषैर्न लिप्तो भवति तथैकोपि सर्वभूतान्तरात्मा सन्नपि लोकदुःखेन न लिप्यते। यतः स सर्वदुःखेभ्यः सर्व-पदार्थेभ्यश्च बाह्य एव भवति न सम्पृक्तो भवति ॥ ११ ॥

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति। तमात्मसंस्थं येनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥१२॥

स च सर्वभूतान्तरात्मा वशी। सर्वथा स्वतन्त्रः सन्नेकं रूपं स्वकीयं यो बहुधा बहुप्रकारकमितिभावः। करोति। तमात्मसंस्थं निराधारं यत्किञ्चिदाधार-निरपेक्षं येनुपश्यन्ति विदन्ति धीरा विद्वांसस्तेषामेव शाश्वतं नित्यं सुखं नेतरेषाम्। सर्वं मत्स्वरूपमेवेति मन्वाना विद्वांसो न कुतश्चित्सर्पव्याघ्रादिभ्योपि न बिभ्यति। भयाभाव एव सुखम्। परस्माद्वै भयं भवति। न विद्यते किञ्चिदिह परम्। सर्वं तदेव। ततश्च न दुःखदर्शनम्।

नित्योनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तमात्मस्थं येनुपश्यन्ति धीरा-स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥

अनित्यानां भवीयपदार्थानां मध्ये यो नित्यश्चे-तनानां च यश्चेतनश्चेतयिता बहूनां मध्ये स्थितोपि य एकः सन्नपि सर्वेषां कामान् बहुविधान्विदधाति पुष्णाति तं स्वस्थमात्मानं ये धीरा बुद्धिमन्तोनुपश्यन्ति विजानन्ति तेषामेव शाश्वती नित्या शान्तिर्भवति नेतरेषामविदुषाम् ॥ १३ ॥

तदेतदिति मन्यन्ते निर्देश्यं परमं सुखम्। कथं नु तद्विजानीयां किमु भाति विभाति वा ॥ १४ ॥

तदेतद् इति एतत्सर्वं दृश्यमानं तदेवेति मन्यन्ते भवन्तः, तथापि तदनिर्देश्यमपि। केनापि प्रकारेण तस्य निर्देशः कर्तुं न शक्यः। अथापि तत्परमं सुखमा-नन्दस्वरूपमित्यपि भवन्तो मन्यन्ते। तर्ह्यहं कथं नु विजानीयां तद्ब्रह्म विभाति न वा विभाति। भवन्त आचार्यास्तत्तत्त्वमनिर्देश्यमप्युपदिशन्ति तदेतदिति मन्यन्त इत्यभिधाय तदर्थं तच्छब्दनिर्देशोपि क्रियते। उभयं मिथोविरुद्धं भवतैवोपदिश्यते तर्हि कथमहं विजानीयां तद्भाति न वा भाति। भानमपि भवतै-वोच्यते तस्याभानमपि भवतैव निर्दिश्यते। तत्र मया किं ज्ञातव्यं तस्य भानं वाभानं वेति। अत्र पूर्वार्धं यमवचनम्। उत्तरार्धं च नचिकेतोवचनमिति वेदि-तव्यम् ॥ १४ ॥

यम आह—

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः। तमेव भान्तमनुभाति सर्वं तस्यभासा सर्वमिदं विभाति ॥ १५ ॥

यमो वदति। तत्र तं सूर्यः सर्वप्रकाशकोपि न प्रकाशयति चन्द्रतारकं चन्द्रस्तारका अपि न भासयन्ति इमा विद्युतोपि न तं प्रकाशयन्ति। एवं स्थितेयमग्नि-र्लौकिकोल्पसामर्थ्यः कुतस्तं भासयेत्? न कश्चित्तस्य प्रकाशकः परं स एव सर्वेषां प्रकाशक इत्याह—तमेव भान्तं देदीप्यमावमनु सर्वं भाति। ततश्चेदं निष्पन्नं—तस्यैव भासा प्रकाशेन सर्वमिदं प्रकाशकवस्तुजातं विभाति प्रकाशते। श्रोतुरनिष्टमपि महता प्रयत्नेन बोधितमपि ब्रह्म न तल्लाभायेति ॥ १५ ॥

इति काठकोपनिषदि द्वितीयाध्यायस्य द्वितीयस्यां वल्ल्यां काशी-पण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-परिव्राजकाचार्य-स्वामी-श्रीभगवदाचार्येण निर्मितं काठकोपनिषत्संस्कारभाष्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ काठकोपनिषदि

द्वितीयेध्याये तृतीया वल्ली

ऊर्ध्वमूलोवाक्शाखा एषोश्वत्थः सनातनः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वै तत् ॥ १ ॥

ऊर्ध्वंमूल उर्ध्वमुपरीतिशब्दप्रतिपाद्ये दिग्विभागे मूलं प्रतिष्ठा स्थितिर्यस्य स उपरिष्ठ इत्यर्थः। अवाक्-शाखोवागधइतिशब्दप्रतिपाद्ये दिग्विभागे शाखा व्याप्ति-र्यस्य सः। अधोभागमपि व्याप्यावस्थितः। अश्वत्थोश्व इव वेगवत्तया सर्वत्रावशिष्टेष्वपि दिग्विभागेषु तिष्ठतीति सोश्वत्थः सर्वव्यापक इत्यर्थः। सनातनोनादिनिधनः। तदेव य ईदृक् सर्वमभिव्याप्य स्थितस्तदेव शुक्रं प्रकाश-स्वरूपं तदेव ब्रह्म तदेवामृतमुच्यते। तस्मिन्सर्वे लोकाः श्रिताः। तत्कश्चन नात्येति। एतद्वै तद्ब्रह्म। क्वचित्तत् क्वचिदेतद्, क्वचित्पुंस्त्वेन निर्देशः। क्वचित्क्लीबत्वेन। एषा व्यवस्थैवौपनिषदी मर्यादा। एतच्छ्रुतिव्याख्याने या आपदो मया क्रीयन्ते ता नात्यन्तमविदिता मे। अन्यैश्च व्याख्यातृभिः सर्वैरेव मूलमिति शाखेति च पदे दृष्ट्वाश्वत्थ इतिपदस्य संसारवृक्षस्यानित्यत्वात्सनातन-शब्दस्य चिरकालप्रवृत्त इत्यर्थो वर्ण्यते। तदेवेत्यत्र समापतितस्य तच्छब्दस्योर्ध्वमूलेत्यस्यैकदेशेन सम्बन्धं प्रतिपाद्य तन्मूलं संसारमूलमित्यर्थः, इत्येवमर्थंप्रति-पादनमिष्यते। इदं सर्वमेवासमञ्जसम्। एतामेव श्रुति-मनुहरतो गीताश्लोकस्य व्याख्यानं तु गीतायामेव स्पष्टी-कृतं मया। एवं च यद्यपि रेखानुयायिनामृजुमतीनां स्यादेवैषा व्याख्या क्लेशाय परन्तु विद्वदपश्चिमानां भावरत्नाकरावगाहनबद्धपरिकराणां परमानन्दायैव स्यादिदं व्याख्यानमिति तुष्यतु कोपि काठकोपनि-षत्कारः ॥ १ ॥

ननु तदु नात्येति कश्चनेत्युक्तम् किञ्चिदधिकं वक्तुमाह—

यदिदं किंच जगत्सर्वं प्राण एजति निस्सृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥

यदिदं किञ्चिन्निस्सृतं जातं जगदस्ति सत्सर्वं प्राणे सर्वंप्राणप्रदे ब्रह्मण्येजते तिष्ठतीतितात्पर्यम्। एतद्-ब्रह्म महद्भयं दुराचाराणामुद्यतमुत्थितम्। ये विद्वांस एतद्ब्रह्म विदुस्तेमृता भवन्ति ॥ २ ॥

भयादस्याग्निस्तपति भयात्तपति सूर्यं। भयादि-न्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥

मृत्युर्धावति ब्रह्मविदं परित्यज्य दूरमपसरति। अन्यत्स्पष्टम्।

इह चेदशकद्बोद्धुं प्राक्छरीरस्य विस्रसः। ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥

इहैवस्मिन्नेव जन्मनि शरीरे वा शरीरस्य विस्रसो विनाशात्प्रागिदं ब्रह्म बोद्धुमशकच्चेच्छिवं भवति। अन्यथा ततः पश्चान्मरणानन्तरं सर्गेषु जातेषु रचितेषु लोकेषु शरीरत्वाय कल्पते पुनः शरीरं गृह्णात्येव। सर्गेषु लोकेष्विति बहुवचनं दृष्ट्वा न भेतव्यम्। यदि स्यात्पुनर्जन्मात्रैव। अयं चैक एव लोकः ॥ ४ ॥

यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके। यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ॥ ५ ॥

यथादर्शे दर्पणे स्वप्रतिबिम्बं दृश्यते तथात्मनि दृश्ये ब्रह्मप्रतिबिम्बम्। ब्रह्मणः प्रतिबिम्बाभावादब्रह्म-प्रतीतिरित्यर्थो वेदितव्यः। यथा स्वप्ने पदार्थप्रतीतिमात्रं भवति नास्ति वस्तुस्तथैव पितृलोके मनुष्यलोके मनुष्य-जन्मनि पदार्थप्रतीतिर्भवति। यथाप्सु परिददृश इव बिम्बं दृश्यते तथा गन्धर्वलोकेपि। ब्रह्मलोके चतुर्मुखस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोके छायातपयोरिव पदार्थप्रतीतिः। कदाचिज्जायमाना छाया सुखयति कदाचिच्च जायमान आतपः सन्तापयति। एवं ब्रह्मलोकेपि पर्यायेण सुखदुःखप्रतीतिर्भवतीत्यर्थः। नात्र किञ्चित्तत्त्वम्। प्राचीनानां संवाद एषः॥ ५॥

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्। पृथगुत्पद्यमानानां मत्वा धीरो न शोचति॥ ६॥

पृथगुत्पद्यमानानामिन्द्रियाणां पृथग्भावं तेषामुदयास्तमयौ च पृथङ्मत्वा धीरो न शोचति। इन्द्रियाण्येवात्मेति न। तान्यात्मतः पृथक्। तेषामुदयोस्तङ्गमनं च पृथक्। न हीन्द्रियाणामुदय आत्मन उदयस्तेषामस्तङ्गमनं च नात्मनोस्तङ्गमनम्। एवं नित्यत्वमात्मनो मत्वा धीरो न शोचति॥ ६॥

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्। सत्त्वादधि महानात्मा महतोव्यक्तमुत्तमम्॥ ७॥

इन्द्रियेभ्यो मनः परमुत्तमम्। मनसः सत्त्वं बुद्धिरुत्तमा। सत्त्वाद्बुद्धेर्महानात्मा शरीरमुत्तमम्। महतः शरीरात्स्थूलादव्यक्तं यत्तत्त्वं तदुत्तमम्॥ ७॥

अव्यक्तत्तु परः पुरुषो व्यापकोलिङ्ग एव च। यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति॥ ८॥

अव्यक्तात्तु पुरुष परः श्रेष्ठः। स च व्यापकः। अलिङ्ग एव च नास्ति तस्य लिङ्ग किञ्चित्। यं पुरुषं ज्ञात्वा जन्तु प्राणो मुच्यते मुक्तो भवति। एतदेव शब्दान्तरेण कथयति अमृतत्वं च गच्छतीति॥ ८॥

न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्। हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति॥ ९॥

अस्यात्मनो रूपं सन्दृशे दर्शनपथे न तिष्ठति। न ह्यात्मा चक्षुषावलोक्यते। सन्दृशे रूपं न तिष्ठत्यत एव चक्षुषा नावलोक्यते। कथं नावलोक्यत आत्मेत्यत आह—हृदा हृदयेन मनीषा मनीषया बुद्ध्या मनसा चाभिक्लृप्तः। य एतत्तत्त्वं विदुस्तेमृता भवन्ति॥ ९॥

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टयति तामाहुः परमां गतिम्॥ १०॥

यदा पञ्च ज्ञानानि ज्ञानेन्द्रियाणि मनसा सहावतिष्ठन्ते बुद्धिश्च न विचेष्टति विविधाश्चेष्टाः करोति तामेतां गतिं स्थितिं परमामुत्तमामाहुः॥ १०॥

तां योगमिति मन्यते स्थिरामिन्द्रियधारणाम्। अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥११॥

तामेव गतिं—तामेव स्थिरामिन्द्रियधारणां विद्वांसो योगमिति मन्यन्त। तदैव योगी भवत्यप्रमत्तः प्रमादरहितः संशयशून्यो भवति। योगो हि प्रभवाप्ययौ योग एव प्रभवो योग एवाप्ययः। यदि स्थिरो योगस्तर्हि स आत्मनः प्रभवः दर्शनस्य कारयिता भवति। यद्यस्थिरोप्यस्य विनाशस्य कारयिता भवतीति तात्पर्यम्॥११॥

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा। अस्तीति ब्रुवतोन्यत्र कथं तदुपलभ्यते॥ १२॥

तत्त्वबुभुत्सुं शिष्यं तत्त्वमवबोधयति। स आत्मा न वाचा वाच्यः। न मनसा मन्तुं शक्यः, न चक्षुषा प्राप्तुं द्रष्टुं शक्यः। तर्ह्यात्मास्ति ब्रह्म वास्तीति कथं समर्थयितुं शक्यम्? उच्यते। अस्तीति ब्रुवतोन्यत्र, आत्मास्ति, ब्रह्मास्तीतिकथनमात्रम्। कथनमात्रादन्यत्र कथं तदुपलभ्यते। यदि वस्तुत आत्मतत्त्वं स्यादुक्तं मतं दृष्टं च स्यात्। नास्त्येव तत् ततो न केनापि साधनेन तदुपलभ्यते। इदमेवौपनिषदं तत्त्वम्॥ १२॥

अस्तीत्येवोपलब्धव्यस्तत्त्वभावे न चोभयोः। अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति॥ १३॥

अस्तीति कल्पना। अस्त्येवेति तत्त्वम्। अस्ति काल्पनिक आत्मास्तीति तत्त्वभावेन स उपलब्धव्यः। असन्नपि सन्निति मत्वोपलब्धव्यः सः। ननु नास्त्येवात्मेति चेदस्तित्वेन कथमुपलब्धव्यः सः? उच्यते। काल्पनिक एव स काल्पनिक एव तत्त्वभावेनास्तित्वभावेन तस्योपलब्धिः। उभयोरस्तित्वतत्त्वभावयोः कल्पितास्तित्वतत्त्वभावयोरित्यर्थः। अस्तीत्येवोपलब्धस्योपलब्धुस्तत्त्वभावः प्रसीदति फलं दातुमुद्यतो भवति। यथा कल्पितोपि भूतप्रेतादिर्दुःखाय भयाय च भवति कल्पितोपि प्रियसमागमः सुखायैव भवति। एवमसतोप्यात्मनः कल्पितापिप्रतीतिस्तत्त्वं प्रकाशयति॥ १३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥

ब्रह्मप्राप्तेर्मुख्यं साधनमाह—अस्यात्मनो हृदि ये कामा अभिलाषाः पुत्रपौत्रादिविषयकाः स्थिताः सन्ति ते यदा प्रमुच्यन्ते निर्गलितबीजा भवन्ति अथ तदा मर्त्यो मृत्युलोकविषयप्रवणोऽमृतो भवति मुक्तो भवति। अत्रैव चास्मिन्नेव देहे, देहे स्थिते सत्येव ब्रह्म समश्नुते ब्रह्माभावमाप्नोति ॥ १४ ॥

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥ १५ ॥

यदात्मनो हृदयस्य सर्वे ग्रन्थयो विकारा इह प्रभिद्यन्ते नितरां भिद्यन्ते निःशेषा भवन्ति अथ तदा मर्त्योऽमृतो भवति। एतावदेवानुशासनं कर्तव्योपदेश एतावानेव हृदयग्रन्थयो भेत्तव्या इति।

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ १६ ॥

हृदयस्य नाड्यः शतं चैका च। तासामेका मूर्धानमभिनिःसृता मूर्धानमभिगता। तयैकया नाड्योर्ध्वमायन् प्राप्नुवन्नमृतत्वमेति। अन्याश्च नाड्यो विष्वङ् यत्रतत्रोत्क्रमणे भवन्ति अन्याभिर्नाडीभिर्निस्सृत आत्मा पुनर्जन्मानि गृह्णातीत्याशयः। एतदविद्वदुपासकानां प्ररोचनार्थं वचनम् ॥ १६ ॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण। तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतम् ॥ १७ ॥

अङ्गुष्ठमात्रोऽतिसूक्ष्मः पुरुषः शरीरस्थोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं पुरुषं स्वात्स्वस्माच्छरीरात्प्रवर्धयेच्छरीराद्बहिर्निष्कास्य स्वरूपं प्रापयेत् धैर्येण प्रमादराहित्येन। एतेन प्रकारेण शरीरान्निस्सृतं तं शुक्रममृतं विद्यात्। द्विरुक्तिरुपनिषत्समाप्तिसूचिका ॥ १७ ॥

ग्रन्थकारः फलश्रुतिं पठति—

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्। ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥१८॥

अथ मृत्युप्रोक्तामेतां विद्यां कृत्स्नं योगविधिं च लब्ध्वा नचिकेता ब्रह्मप्राप्तः सन् विरजा विमृत्युरभूत्। अन्योऽपि य एवंवित् सोऽप्यध्यात्ममेव प्राप्तो भवेत् ॥ १८ ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै ॥ १८ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

सह सहैव यौगपद्येन नावावामवतु रक्षतु। सहैव नौ शिष्याचार्यौ भुनक्तु पालयतु। सहैव वीर्यं सामर्थ्यं ज्ञानजन्यं करवावहै सम्पादयाव। तेजस्वि भवतु नावावयोरधीतम्। परस्परं च मा विद्विषावहै। अत्रावनपालनयोरैकार्थ्येऽपि कथञ्चिद्भेदमाश्रित्योक्तिः। शरीरसंरक्षणं भुजेरर्थः। ज्ञानादीनां रक्षणमवतेरर्थं इति विभावनीयम् ॥ १९ ॥

इति श्रीकाठकोपनिषदि तृतीयवल्ल्यां

काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-
परिव्राजकाचार्य-स्वामि-श्रीभगवदाचार्येण निर्मितं
काठकोपनिषत्संस्कारभाष्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri